Bombay Sanskrit Series.

No. III.

PANCHATANTRA II. AND III.

Sansk 4
6I6 c.


Digitized by Google

Bombay Sanskrit Series.

No. III.

Vishnu-Sarman

PANCHATANTRA II. AND III.



EDITED WITH NOTES,

BY

G. BÜHLER, Ph. D.,

PROFESSOR OF ORIENTAL LANGUAGES, ELPHINSTONE COLLEGE.

Registered under Act XXV. of 1867.

Bombay:

PRINTED AT THE "INDU-PRAKASH" PRESS.

1868.

Digitized by Google

Digitized by Google

Bombay Sanskrit Series.

No. III.

Vishnu-Sarman

PANCHATANTRA II. AND III.



EDITED WITH NOTES,

BY

G. BÜHLER, Ph. D.,

PROFESSOR OF ORIENTAL LANGUAGES, ELPHINSTONE COLLEGE.

Registered under Act XXV. of 1867.

Bombay:

PRINTED AT THE "INDU-PRAKASH" PRESS.

1868.

Digitized by Google

Digitized by Google

अथेदमारभ्यते मित्रप्राप्तिकं नाम द्वितीयं तन्त्रं यस्यायमादिमः श्लोकः ।

असाधना अपि प्राज्ञा बुद्धिमन्तो बहुश्रुताः ।
साधयन्त्याशु कार्याणि काकाखुमृगकूर्मवत् ॥ १ ॥

तद्यथानुश्रूयते ।

अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तस्य नातिदूरेण महाच्छायावाल्यग्रोधपादपो नानाविहंगोपभुक्तफलः कीटैरावृतकोटरश्छायाश्वासितपथिकजनसमूहश्च । अथवा युक्तम् ।

छायासुप्तमृगः शकुन्तिनिवहैर्विष्वग्विलुप्तच्छदः
कीटैरावृतकोटरः कपिकुलैः स्कन्धे कृतप्रश्रयः ।
विश्रब्धं मधुपैर्निपीतकुसुमः श्लाघ्यः सतां सत्तरुः
सर्वाङ्गैर्बहुजीवसंघसुखदो भूभारभूतोपरः ॥ २ ॥

तत्र च लघुपतनको नाम वायसः प्रतिवसति स्म । स कदाचित्प्राणयात्रार्थं पुरमुद्दिश्य प्रचलितो यावत्पश्यति तावज्जालहस्तोतिकृष्णतनुः स्फुटितचरण ऊर्ध्वकेशो यमकिंकराकारो नरः संमुखो बभूव । अथ तं दृष्ट्वा व्यचिन्तयत् । यदयं दुरात्माद्य ममाश्रयवटपादपसंमुखोभ्येति । तन्न ज्ञायते किमद्य वटवासिनां विहंगानां विनाशो भविष्यति न वा । एवं बहुविधं विचिन्त्य तत्क्षणान्निवृत्य तमेव वटपादपं गत्वा सर्वान्विहंगान्प्रोवाच । भो अयं दुरात्मा लुब्धको जालतण्डुलहस्तः समभ्येति । तत्सर्वथा तस्य न विश्वसनीयम् । एष जालं प्रसार्य तण्डुलान्प्रक्षेप्स्यति । ते भवद्भिः सर्वैरपि हालाहलसदृशा

Digitized by Google

द्रष्टव्याः । एवं वदतस्तस्य स लुब्धकस्तत्र वटतल आगत्य जालं प्रसार्य सिन्दुवारसदृशांस्तण्डुलान्प्रक्षिप्य नातिदूरं गत्वा निभृतः स्थितः । अथ ये पक्षिणस्तत्र स्थितास्ते लघुपतनकवावयार्गलया निवारितास्तांस्तण्डुलान्हालाहलाङ्कुरानिव वीक्षमाणा निभृतास्तस्थुः ।

अत्रान्तरे चित्रग्रीवो नाम कपोतराजः सहस्रपरिवारः प्राणयात्रार्थं परिभ्रमंस्तांस्तण्डुलान्दूरतोपि पश्यंल्लघुपतनकेन निवार्यमाणोपि जिह्वालौल्याद्भक्षणार्थमपतत्सपरिवारो निबद्धश्च । अथवा साध्विदमुच्यते ।

जिह्वालौल्यप्रसक्तानां जलमध्यनिवासिनाम् ।
अचिन्तितो वधोज्ञानां मीनानामिव जायते ॥ ३ ॥

अथवा न तस्य दोषोस्ति । उक्तं च ।

पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान्
रामेणापि कथं न हेमहरिणस्यासंभवो लक्षितः ।
अक्षैश्चापि युधिष्ठिरेण सहसा प्राप्तो ह्यनर्थः कथं
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ॥ ४ ॥

तथा च ।

कृतान्तपाशबद्धानां दैवोपहतचेतसाम् ।
बुद्धयः कुब्जगामिन्यो भवन्ति महतामपि ॥ ५ ॥

अत्रान्तरे लुब्धकस्तान्बद्धान्विज्ञाय प्रहृष्टमनाः प्रोद्यतयष्टिस्तद्ग्रहार्थं प्रधावितः । चित्रग्रीवोप्यात्मानं सपरिवारं बद्धं मत्वा लुब्धकमायान्तं दृष्ट्वा तान्कपोतानूचे । अहो न भेतव्यम् । उक्तं च ।

व्यसनेष्वेव सर्वेषु यस्य बुद्धिर्न हीयते ।
स तेषां पारमभ्येति तत्प्रभावादसंशयम् ॥ ६ ॥

Digitized by Google

तत्सर्वे हेलयोड्डीय सपाशजाला अस्यादर्शनं गत्वा मुक्तिं प्राप्नुमः। नो चेद्वयविक्लवाः सन्तो हेलया समुत्पातं न करिष्यथ ततो मृत्युमवाप्स्यथ । उक्तं च ।

तनवोप्यायता नित्यं तन्तवो बहुलाः समाः ।
बहून्बहुत्वादायासान्सहन्तीत्युपमा सताम् ॥ ७ ॥

तथानुष्ठिते लुब्धको जालमादायाकाशे गच्छतां तेषां पृष्ठतो भूमिस्थोपि पर्यधावत् । तत ऊर्ध्वाननः श्लोकमपठत् ।

जालमादाय गच्छन्ति संहताः पक्षिणोप्यमी ।
यावच्च विवदिष्यन्ते पतिष्यन्ति न संशयः ॥ ८ ॥

लघुपतनकोपि प्राणयात्राक्रियां त्यक्त्वा किमत्र भविष्यतीति कुतूहलात्तत्पृष्ठलग्नोनुसरति । अथ दृष्टेरगोचरतां गतान्विज्ञाय लुब्धको निराशः श्लोकमपठन्निवृत्तश्च ।

न हि भवति यन्न भाव्यं भवति च भाव्यं विनापि यत्नेन ।
करतलगतमपि नश्यति यस्य हि भवितव्यता नास्ति ॥ ९ ॥

तथा च ।

पराङ्मुखे विधौ चेत्स्यात्कथंचिद्व्रविणोदयः ।
तत्सोन्यदापि संगृह्य याति शङ्खनिधिर्यथा ॥ १० ॥

तदास्तां तावद्विहंगामिषालाभः । कुटुम्बवर्तनोपायभूतं जालमपि मे नष्टम् । चित्रग्रीवोपि लुब्धकमदर्शनीभूतं ज्ञात्वा तानुवाच । भो निवृत्तः स दुरात्मा लुब्धकः । तत्सर्वैरपि स्वस्थैर्गम्यतां महिलारोप्यस्य प्रागुत्तरदिग्भागे । तत्र मम सुहृद्धिरण्यको नाम मूषकः । सर्वेषां स पाशच्छेदं विधास्यति । उक्तं च ।

सर्वेषामेव मर्त्यानां व्यसने समुपस्थिते ॥

Digitized by Google

वाङ्मात्रेणापि साहाय्यं मित्रादन्यो न संदधे ॥ ११ ॥

एवं ते कपोताश्चित्रग्रीवेण संबोधिता महिलारोप्ये नगरे हिरण्यकबिलदुर्गं प्रापुः । हिरण्यकोपि सहस्रमुखबिलदुर्गं प्रविष्टोकुतोभयः सुखेनास्ते । अथवा साध्विदमुच्यते ।

दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः ।
सर्वेषां जायते वश्यो दुर्गहीनस्तथा नृपः ॥ १२ ॥

तथा च ।

न गजानां सहस्रेण न च लक्षेण वाजिनाम् ।
तत्कर्म सिध्यते राज्ञां दुर्गेणैकेन यद्रणे ॥ १३ ॥

शतमेकोपि संधत्ते प्राकारस्थो धनुर्धरः ।
तस्माद्दुर्गं प्रशंसन्ति नीतिशास्त्रविदो जनाः ॥ १४ ॥

अथ चित्रग्रीवो बिलमासाद्य तारस्वरेण प्रोवाच । भो भो मित्र हिरण्यक सत्वरमागच्छ । महती मे व्यसनावस्था वर्तते । तच्छ्रुत्वा हिरण्यकोपि बिलदुर्गान्तर्गतः सन्प्रोवाच । भोः को भवान् । किमर्थमायातः । किं कारणम् । कीदृक्ते व्यसनावस्थानम् । तत्कथ्यतामिति । तच्छ्रुत्वा चित्रग्रीव आह । भोश्चित्रग्रीवो नाम कपोतराजोहं ते सुहृत् । तत्सत्वरमागच्छ । गुरुतरं प्रयोजनमस्ति । तदाकर्ण्य पुलकिततनुः प्रहृष्टात्मा स्थिरमनास्त्वरमाणो निष्क्रान्तः । अथवा साध्विदमुच्यते ।

सुहृदः स्नेहसंपन्ना लोचनानन्ददायिनः ।
गृहे गृहवतां नित्यं नागच्छन्ति महात्मनाम् ॥ १५ ॥

तथा च ।

भवनेतिथयो यस्य समागच्छन्ति नित्यशः ।
यत्सौख्यं तस्य चित्ते स्यान्न तत्स्वर्गेपि जायते ॥ १६ ॥

Digitized by Google

अथ चित्रग्रीवं सपरिजनं बद्धमालोक्य हिरण्यकः सविषादमिदमाह । भोः किमेतत् । स आह । भो जानन्नपि किं पृच्छसि । उक्तं च यतः ।

यस्माच्च येन च यथा च यदा च यच्च
यावच्च यत्र च शुभाशुभमात्मकर्म ।
तस्माच्च तेन च तथा च तदा च तच्च
तावच्च तत्र च कृतान्तवशादुपैति ॥ १७ ॥

तत्प्राप्तं मयैतद्व्यसनं जिह्वालौल्यात् । तत्त्वं पाशमोक्षं कुरु माविलम्बम् । तदाकर्ण्य हिरण्यकः प्राह ।

अध्यर्धाद्योजनशतादामिषं वीक्षते खगः ।
सोपि पार्श्वस्थितं दैवाद्बन्धनं न च पश्यति ॥ १८ ॥

तथा च ।

रविनिशाकरयोर्ग्रहपीडनं
गजभुजंगविहंगमबन्धनम् ।
मतिमतां च निरीक्ष्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥ १९ ॥

तथा च ।

व्योमैकान्तविहारिणोपि विहगाः संप्राप्नुवन्त्यापदं
बध्यन्ते निपुणैरगाधसलिलान्मीनाः समुद्रादपि ।
दुर्नीतं किमिहास्ति किं च सुकृतं कः स्थानलाभे गुणः
कालः सर्वजनान्प्रसारितकरो गृह्णाति दूरादपि ॥ २० ॥

एवमुक्त्वा चित्रग्रीवस्य पाशं छेत्तुमुद्यतं स तमाह । भद्र मा मैवं कुरु । प्रथमं मम भृत्यानां पाशच्छेदं कुरु तदनु ममापि च । त-

Digitized by Google

च्छ्रुत्वा कुपितो हिरण्यकः प्राह । भो न युक्तमुक्तं भवता यतः स्वामिनोनन्तरं मृत्याः । स आह । भद्र मा मैवं वद । मदाश्रयाः सर्व एते वराकाः । अपरं स्वकुटुम्बं परित्यज्य समागताः । तत्कथमेतावन्मात्रमपि संमानं न करोमि । उक्तं च ।

यः संमानं समाधत्ते भृत्यानां क्षितिपोधिकम् ।
वित्ताभावेपि तं दृष्ट्वा ते त्यजन्ति न कर्हिचित् ॥ २१ ॥

तथा च ।

विश्वासः संपदां मूलं तेन यूथपतिर्गजः ।
सिंहो मृगाधिपत्येपि न मृगैरुपयुज्यते ॥ २२ ॥

अपरं मम कदाचित्पाशच्छेदं कुर्वतस्ते दन्तभङ्गो भवति । अथवा दुरात्मा लुब्धकः समभ्येति । तन्नूनं मम नरकपात एव । उक्तं च

सदाचारेषु भृत्येषु संसीदत्सु च यः प्रभुः ।
सुखी स्यान्नरकं याति परत्रेह च सीदति ॥ २३ ॥

तच्छ्रुत्वा प्रतुष्टो हिरण्यकः प्राह । भो वेद्म्यहं राजधर्मम् । परं मया तव परीक्षा कृता । तत्सर्वेषां पूर्वं पाशच्छेदं करिष्यामि । भवानप्येनं विधिना बहुकपोतपरिवारो भविष्यति । उक्तं च ।

कारुण्यं संविभागश्च यस्य भृत्येषु सर्वदा ।
संभवेत्स महीपालस्त्रैलोक्यस्यापि रक्षणे ॥ २४ ॥

एवमुक्त्वा सर्वेषां पाशच्छेदं कृत्वा हिरण्यकश्चित्रग्रीवमाह । मित्र गम्यतामधुना स्वाश्रये । भूयोपि व्यसने प्राप्ते समागन्तव्यम् । इति तान्प्रेष्य पुनरपि दुर्गं प्रविष्टः । चित्रग्रीवोपि सपरिवारः स्वाश्रयमगमत् । अथवा साध्विदमुच्यते ।

मित्रवान्साधयत्यर्थान्दुःसाध्यानपि वै यतः ।

तस्मान्मित्राणि कुर्वीत समानान्येव चात्मनः ॥ २५ ॥

लघुपतनकोपि सर्वं तं चित्रग्रीवबन्धमोक्षमवलोक्य विस्मितमना व्यचिन्तयत् । अहो बुद्धिरस्य हिरण्यकस्य शक्तिश्च दुर्गस्य सामग्री च । तदीदृगेव विधिर्विहंगानां बन्धनमोक्षात्मकः । अहं च न कस्यचिद्विश्वसिमि चलप्रकृतिश्च । तथाप्येनं मित्रं करोमि । उक्तं च । 5

अपि संपूर्णतायुक्तैः कर्तव्याः सुहृदो बुधैः ।
नदीशः परिपूर्णोपि चन्द्रोदयमुपेक्षते ॥ २६ ॥

एवं संप्रधार्य पादपादवतीर्य बिलद्वारमाश्रित्य चित्रग्रीववच्छब्देन हिरण्यकं समाहूतवान् । एह्येहि भो हिरण्यक एहि । तच्छब्दं श्रुत्वा हिरण्यको व्यचिन्तयत् । किमन्योपि कश्चित्कपोतो बन्धनशेषस्तिष्ठति 10
येन मां व्याहरति । आह च । भोः को भवान् । स आह । अहं लघुपतनको नाम वायसः । तच्छ्रुत्वा विशेषादन्तर्लीनो हिरण्यक आह । भो द्रुतं गम्यतामस्मात्स्थानात् । वायस आह । अहं तव पार्श्वे गुरुकार्येण समागतः । तत्किं न क्रियते मया सह दर्शनम् । हिरण्यक आह । न मेस्ति त्वया सह संगमेन प्रयोजनमिति । स आह । भो- 15
श्चित्रग्रीवस्य मया तव सकाशात्पाशमोक्षणं दृष्टम् । तेन मम महती प्रीतिः संजाता । तत्कदाचिन्ममापि बन्धने जाते तव पार्श्वान्मुक्तिर्भवेति । तत्क्रियतां मया सह मैत्री । हिरण्यक आह । अहो त्वं भोक्ता । अहं ते भोज्यभूतः । तत्का त्वया सह मम मैत्री । तद्गम्यतां मैत्रीविरोधभावात् । उक्तं च । 20

ययोरेव समं वित्तं ययोरेव समं कुलम् ।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ॥ २७ ॥

तथा च ।

Digitized by Google

यो मित्रं कुरुते मूढ आत्मनोसदृशं कुधीः ।
हीनं वाप्यधिकं वापि हास्यतां यात्यसौ जनः ॥ २८ ॥

तद्गम्यतामिति । वायस आह । भो हिरण्यक एषोहं तव दुर्गद्वार उपविष्टः । यदि त्वं मैत्रीं करोषि ततोहं प्राणयात्रां करिष्यामि । अन्यथा प्रायोपवेशनं मे स्यादिति । हिरण्यक आह । भोस्त्वया वैरिणा सह कथं मैत्रीं करोमि । उक्तं च ।

वैरिणा न हि संदध्यात्सुश्लिष्टेनापि संधिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ २९ ॥

वायस आह । भोस्त्वया सह दर्शनमपि नास्ति कुतो वैरम् । तत्किमनुचितं वदसि । हिरण्यक आह । द्विविधं वैरं भवति सहजं कृत्रिमं च । तत्सहजवैरी त्वमस्माकम् । उक्तं च ।

कृत्रिमं नाशमभ्येति वैरं द्राक्कृत्रिमैर्गुणैः ।
प्राणदानं विना नैव सहजं याति संक्षयम् ॥ ३० ॥

वायस आह । भो द्विविधस्य वैरस्य लक्षणं श्रोतुमिच्छामि । तत्कथ्यताम् । हिरण्यक आह । भोः कारणेन निर्वृत्तं कृत्रिमम् । तत्तदर्थोपकारकरणाद्गच्छति । स्वाभाविकं च पुनः कथमपि न गच्छति । तद्यथा नकुलसर्पाणां शष्पभुङ्नखायुधानां जलवह्नीर्देवदैत्यानां सारमेयमार्जाराणामीश्वरदरिद्राणां सपत्नीनां सिंहगजानां लुब्धकहरिणानां श्रोत्रियधर्मक्रियाणां मूर्खपण्डितानां पतिव्रताकुलटानां सज्जनदुर्जनानाम् । न कश्चित्केनापि व्यापादितः । तथापि प्राणान्संतापयन्ति स्म । वायस आह । तदकारणमेतत् । श्रूयतां मे वचनम् ।

कारणान्मित्रतां याति कारणाद्याति शत्रुतां ।
तस्मान्मित्रत्वमेवात्र योज्यं वैरं न धीमता ॥ ३१ ॥

Digitized by Google

तस्मात्कुरु मया सह समागमं मित्रधर्मार्थम् । हिरण्यक आह । भोः श्रूयतां नीतिसर्वस्वम् ।

सकृद्दुष्टमपोष्टं यः पुनः संधातुमिच्छति ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ ३१ ॥

अथवा गुणवानहं न मे कश्चिद्वैरयातनां करिष्यत्येतदपि न संभाव्यम् । उक्तं च ।

सिंहो व्याकरणस्य कर्तुरहरत्प्राणान्प्रियान्पाणिने-
र्मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम् ।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गल-
मज्ञानावृतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः ॥ ३२ ॥

वायस आह । अस्त्येतत्तथापि श्रूयताम् ।

उपकाराच्च लोकानां निमित्तान्मृगपक्षिणाम् ।
भयाल्लोभाच्च मूर्खाणां मैत्री स्याद्दर्शनात्सताम् ॥ ३३ ॥

तत्साधुरहम् । अपरं त्वां शपथादिभिर्निर्भयं करिष्यामि । स आह । न मेस्ति ते शपथैः प्रत्ययः । उक्तं च ।

शपथैः संधितस्यापि न विश्वासं व्रजेद्रिपोः ।
अद्रोहशपथं कृत्वा वृत्रः शक्रेण सूदितः ॥ ३४ ॥
न विश्वासं विना शत्रुर्देवानामपि सिध्यति ।
विश्वासात्त्रिदशेन्द्रेण दितेर्गर्भो विदारितः ॥ ३५ ॥

अन्यच्च ।

बृहस्पतेरपि प्राज्ञस्तस्मान्नैवात्र विश्वसेत् ।
य इच्छेदात्मनो वृद्धिमायुष्यं च सुखानि च ॥ ३६ ॥

तथा च ।

Digitized by Google

सुसूक्ष्मेणापि च्छिद्रेण प्रविश्याभ्यन्तरं रिपुः ।
नाशयेच्च शनैः पश्चात्प्लवं सलिलपूरवत् ॥ ३७ ॥
न विश्वसेदविश्वस्ते विश्वस्तोपि न विश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ३८ ॥
न वध्यते ह्यविश्वस्तो दुर्बलोपि बलोत्कटैः ।
विश्वस्ताश्चाशु वध्यन्ते बलवन्तोपि दुर्बलैः ॥ ३९ ॥
सुकृत्यं विष्णुगुप्तस्य मित्राप्तिर्भार्गवस्य च ।
बृहस्पतेरविश्वासो नीतिसंधिस्त्रिधा स्थितः ॥ ४० ॥

तथा च ।

महताप्यर्थसारेण यो विश्वासं समागतः ।
भार्यासु सुविरक्तासु तदन्तं तस्य जीवितम् ॥ ४१ ॥

तच्छ्रुत्वा लघुपतनकोपि निरुत्तरश्चिन्तयामास । अहो बुद्धिप्रागल्भ्यमस्य नीतिविषये । अथवात एवास्योपरि मैत्रीपक्षपातः । स आह । भो हिरण्यक ।

सख्यं साप्तपदीनं भो इत्याहुर्विबुधा जनाः ।
बलात्त्वं मित्रतां प्राप्तो वचनं मम तच्छृणु ॥ ४२ ॥

दुर्गस्थेनापि त्वया मया सह नित्यमेवालापो गुणदोषसुभाषितगोष्ठीकथादिः सर्वदा कर्तव्यो यद्येवं न विश्वसिषि । तच्छ्रुत्वा हिरण्यकोपि व्यचिन्तयत् । विदग्धवचनोयं दृश्यते लघुपतनकः सत्यवादयश्च । तदुक्तमनेन मैत्रीकरणम् । परं कदाचिन्मम दुर्गे चरणपातोपि न कार्यः । उक्तं च ।

भीतभीतः पुरा शत्रुर्मन्दंमन्दं विसर्पति ।
भूमौ प्रहेलया पश्चाज्जारहस्तोद्भ्रुनास्विव ॥ ४३ ॥

Digitized by Google

तच्छ्रुत्वा वायस आह । भद्र एवं भवतु । ततः प्रभृति द्वौ तावपि सुभाषितमोष्ठीसुखमनुभवन्तौ तिष्ठतः । परस्परं कृतोपकारौ कालं नयतः । लघुपतनकोपि मांसशकलानि मेध्यानि बलिशेषाण्यन्यानि वत्सलाहृतानि पक्वान्नविशेषाणि हिरण्यकार्थमानयति । हिरण्यकोपि तण्डुलानन्यांश्च भक्षविशेषांल्लघुपतनकार्थं रात्रावात्मृत्यं तत्कालायातस्यार्पयति । अथवा युज्यते द्वयोरप्येतत् । उक्तं च ।

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥ ४४ ॥
नोपकारं विना प्रीतिः कथंचित्कस्यचिद्भवेत् ।
उपयाचितदानेन यतो देवा अभीष्टदाः ॥ ४५ ॥
तावत्प्रीतिर्भवेल्लोके यावद्दानं प्रदीयते ।
वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम् ॥ ४६ ॥
पश्य दानस्य माहात्म्यं सद्यः प्रत्ययकारकम् ।
यत्प्रभावादपि द्वेषी मित्रतां याति तत्क्षणात् ॥ ४७ ॥
पुत्रादपि प्रियतरं खलु तेन दानं
मन्ये पशोरपि विवेकविवर्जितस्य ।
दत्ते खलेपि निखिलं खलु येन दुग्धं
नित्यं ददाति महिषी ससुतापि पश्य ॥ ४८ ॥

किं बहुना ।

प्रीतिं निरन्तरां कृत्वा दुर्भेद्यां नखमांसवत् ।
मूषको वायसश्चैव गतौ कृत्रिममित्रताम् ॥ ४९

एवं स मूषकस्तदुपकाररञ्जितस्तथा विश्वस्तो यथा तस्य पक्षमध्ये प्रविष्टस्तेन सह सर्वदैव गोष्ठीं करोति । अथान्यस्मिन्नहनि

Digitized by Google

वायसोश्रुपूर्णनयनः समभ्येत्य सगद्गदं तमुवाच। भद्र हिरण्यक विरक्तिः संजाता मे सांप्रतं देशस्यास्योपरि। तदन्यत्र यास्यामि। हिरण्यक आह। भद्र किं विरक्तेः कारणम्। स आह। भद्र श्रूयताम्। अत्र देशे महत्यानावृष्ट्या दुर्भिक्षं संजातम्। दुर्भिक्षत्वाज्जनो बुबुक्षापीडितः कोपि बलिमात्रमपि न प्रयच्छति। अपरं गृहेगृहे बभुक्षितजनैर्विहंगानां बन्धनाय पाशाः प्रगुणीकृताः सन्ति। अहमप्यायुःशेषतया पाशेन बद्ध उद्धरितोस्मि। एतद्विरक्तेः कारणम्। तेनाहं विदेशं चलित इति वाष्पमोक्षं करोमि। हिरण्यक आह। अथ भवान्क्व प्रस्थितः। स आह। अस्ति दक्षिणापथे वनगहनमध्ये महासरः। तत्र त्वत्तोधिकः परमसुहृत्कूर्मो मन्थरको नाम। स च मे मत्स्यमांसखण्डानि दास्यति। तद्भक्षणात्तेन सह सुभाषितगोष्ठीसुखमनुभवन्सुखेन कालं नेष्यामि। नाहमत्र विहंगानां पाशबन्धनेन क्षयं द्रष्टुमिच्छामि। उक्तं च।

कोतिभारः समर्थानां किं दूरं व्यवसायिनाम्।
को विदेशः सविद्यानां कः परः प्रियवादिनाम्॥ ५०

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते॥ ५१॥

तथा च।

अनावृष्टिहते देशे सस्ये च प्रलयं गते।
धन्यास्तात न पश्यन्ति देशभङ्गं कुलक्षयम्॥ ५२॥

हिरण्यक आह। यद्येवं तदहमपि त्वया सहागमिष्यामि। ममापि महद्दुःखं वर्तते। वायस आह। भोस्तव किं दुःखम्। तत्कथय। हिरण्यक आह। भो बहु वक्तव्यमस्त्यत्र विषये। तत्रैव गत्वा

Digitized by Google

सर्वं सविस्तरं कथयिष्यामि । वायसः आह । अहं तावदाकाशगतिस्तत्कथं भवतो मया सह गमनम् । स आह । यदि मे प्राणान्रक्षसि तदा स्वपृष्ठमारोप्य मां तत्र प्रापयिष्यसि । नान्यथा मम गतिरस्ति । तच्छ्रुत्वा सानन्दं वायस आह । यद्येवं तद्धन्योहं यद्भवतापि सह तत्र कालं नयामि । अहं संपातादिकानष्टावुडीनगतिविशेषान्वेद्मि । तत्समारोह मम पृष्ठं येन सुखेन त्वां तत्सरः प्रापयामि । हिरण्यक आह । उड्डीनानां नामानि श्रोतुमिच्छामि । स आह ।

संपातं विप्रपातं च महापातं निपातनम् ।
वक्रं तिर्यक्कथा चोर्ध्वमष्टमं लघुसंज्ञकम् ॥ ५३ ॥

तच्छ्रुत्वा हिरण्यकस्तत्क्षणादेव तदुपरि समारूढः । सोपि शनैःशनैस्तमादाय संपातोड्डीनप्रस्थितक्रमेण तत्सरः प्राप्तः । ततो लघुपतनकं मूषकाधिष्ठितं विलोक्य दूरतोपि देशकालविदसामान्यकाकोयमिति ज्ञात्वा सत्वरं मन्थरको जले प्रविष्टः । लघुपतनकोपि तीरस्थतरुकोटरे हिरण्यकं मुक्त्वा शाखाग्रमारुह्य तारस्वरेण प्रोवाच । भो मन्थरक आगच्छागच्छ । तव मित्रमहं लघुपतनको नाम वायसश्चिरात्सोत्कण्ठः समायातः । तदागत्यालिङ्ग्य माम् । उक्तं च ।

किं चन्दनैः सकर्पूरैस्तुहिनैः किं च शीतलैः ।
सर्वे ते मित्रगात्रस्य कलां नार्हन्ति षोडशीम् ॥ ५४ ॥

तच्छ्रुत्वा निपुणतरं ज्ञात्वा सत्वरं सलिलान्निष्क्रम्य पुलकिततनुरानन्दाश्रुपूरितनयनो मन्थरकः प्रोवाच । एह्येहि मित्र आलिङ्ग्य माम् । चिरकालान्मया त्वं सम्यङ्ग ज्ञातः । तेनाहं सलिलान्तः प्रविष्टः । उक्तं च ।

यस्य न ज्ञायते वीर्यं न कुलं न विचेष्टितम् ।

Digitized by Google

न तेन संगतिं कुर्यादित्युवाच बृहस्पतिः ॥ ५५ ॥

एवमुक्ते लघुपतनको वृक्षादवतीर्य तमालिङ्गितवान् । अथवा साध्विदमुच्यते ।

अमृतस्य प्रवाहैः किं कायक्षालनसंभवैः ।
चिरान्मित्रपरिष्वङ्गो योसौ मूल्यविवर्जितः ॥ ५६ ॥

एवं द्वावपि तौ विहितालिङ्गनौ परस्परं पुलकितशरीरौ वृक्षादधः समुपविष्टौ प्रोचतुरात्मचरित्रवृत्तान्तम् । हिरण्यकोपि मन्थरकस्य प्रणामं कृत्वा वायसाभ्यासे समुपविष्टः । अथ तं समालोक्य मन्थरको लघुपतनकमाह । भोः कोयं मूषकः । कस्मात्त्वया भक्षभूतोपि पृष्ठमारोप्यानीतः । तन्नात्र स्वल्पकारणेन भाव्यम् । तच्छ्रुत्वा लघुपतनक आह । भो हिरण्यको नाम मूषकोयम् । मम सुहृद्वितीयामिव जीवितम् । तत्किं बहुना ।

पर्जन्यस्य यथा धारा यथा च दिवि तारकाः ।
सिकता रेणवो यद्वत्संख्यया परिवर्जिताः ॥ ५७ ॥
गुणसंख्या परित्यक्ता तद्वदस्य महात्मनः ।
परं निर्वेदमापन्नः संप्राप्तोयं तवान्तिकम् ॥ ५८ ॥

मन्थरक आह । किमस्य वैराग्यकारणम् । वायस आह । पृष्टो मया । परमनेनाभिहितम् । यद्बहु वक्तव्यमस्ति तत्रैव गतः कथयिष्यामि । ममापि न निवेदितम् । तद्भद्र हिरण्यक इदानीं निवेद्यतामुभयोरप्यावयोस्तदात्मनो वैराग्यकारणम् । सोब्रवीत् ।

कथा १.

अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तस्य नातिदूरे मठायतनं भगवतः श्रीमहादेवस्य । तत्र च ताम्रचूडो नाम परि-

Digitized by Google

व्राजकः प्रतिवसति स्म। स च नगरे भिक्षाटनं कृत्वा प्राणयात्रां समाचरति। भिक्षाशेषं च तत्रैव भिक्षापात्रे निधाय तद्भिक्षापात्रं नागदन्ते विलम्ब्य पश्चाद्रात्रौ स्वपिति। प्रत्यूषे च तदन्नं कर्मकराणां दत्त्वा सम्यक्तत्रैव देवतायतने संमार्जनोपलेपमण्डनादिकं समाज्ञापयति। अन्यस्मिन्नहनि मम बान्धवैर्निवेदितम्। स्वामिन् मठायतने सिद्धमन्नं मूषकभयात्तत्रैव भिक्षापात्रे निहितं नागदन्तेवलम्बितं तिष्ठति सदैव। तद्वयं भक्षयितुं न शक्नुमः। स्वामिनः पुनरगम्यं किमपि नास्ति। तत्किं वृथाटनेनान्यत्र। अद्य तत्र गत्वा यथेच्छं भुञ्ज्महे तव प्रसादात्। तदाकर्ण्याहं सकलयूथपरिवृतस्तत्क्षणादेव तत्र गतः। उत्पत्य च तस्मिन्भिक्षापात्रे समारूढः। तत्र भक्ष्यविशेषाणि सेवकानां दत्त्वा पश्चात्स्वयमेव भक्षयामि। सर्वेषां तृप्तो जातायां भूयः स्वगृहं गच्छामः। एवं नित्यमेव तदन्नं भक्षयामि। परिव्राजकोपि यथाशक्ति रक्षति। परं यदैव निद्रान्तरितो भवति तदाहं तत्रारुह्यात्मकृत्यं करोमि। अथ कदाचित्तेन मम रक्षणार्थं महान्यत्नः कृतः। जर्जरवंशः समानीतः। तेन सुप्तोपि मम भयाद्भिक्षापात्रं ताडयति। अहमप्यभक्षितेष्वन्ने प्रहारभयादपसर्पामि। एवं तेन सह सकलां रात्रिं विग्रहपरस्य कालो व्रजति। अथान्यस्मिन्नहनि तस्य मठे बृहत्स्फिक्नामा परिव्राजकस्तस्य सुहृत्तीर्थयात्राप्रसङ्गेन पान्थः प्राघूर्णकः समायातः। तं दृष्ट्वा प्रत्युत्थानविधिना संभाव्य प्रतिपत्तिपूर्वकमभ्यागतक्रियया नियोजितः। ततश्च रात्रावेकत्र कुशसंस्तरे द्वावपि प्रसुप्तौ धर्मकथां कथयितुमारब्धौ। अथ बृहत्स्फिक्कथागोष्ठीषु स ताम्रचूडो मूषकत्रासाद्याक्षिप्तमना जर्जरवंशेन भिक्षापात्रं ताडयंस्तस्य शून्यं प्रतिवचनं प्रयच्छति। तन्मना न किंचिदुदाहरति। अ-

Digitized by Google

थासावभ्यागतः परं कोपमुपागतस्तमुवाच । भोस्ताम्रचूड परिज्ञातस्त्वं सम्यङ्ग सुहृत् । तेन मया सह साल्हादं न जल्पसि । तद्रात्रावपि त्वदीयं मठं त्यक्त्वान्यत्र मठे यास्यामि । उक्तं च ।

एह्यागच्छ समाश्रयासनमिदं कस्माच्चिराद्दृश्यसे
का वार्ता अतिदुर्बलोसि कुशलं प्रीतोस्मि ते दर्शनात् ।
एवं ये समुपागतान्प्रणयिनः प्रल्हादयन्त्यादरात्
तेषां युक्तमशङ्कितेन मनसा हर्म्याणि गन्तुं सदा ॥ ५९ ॥
गृही यत्रागतं दृष्ट्वा दिशो वीक्षेत वाप्यधः ।
तत्र ये सदने यान्ति ते शृङ्गरहिता वृषाः ॥ ६० ॥
नाभ्युत्थानक्रिया यत्र नालापा मधुराक्षराः ।
गुणदोषकथा नैव तत्र हर्म्ये न गम्यते ॥ ६१ ॥

तदेकमठप्राप्त्यापि त्वं गर्वितः । त्यक्तः सुहृत्स्नेहः । नैतद्वेत्सि यत्त्वया मठाश्रयव्याजेन नरकोपार्जना कृता । उक्तं च ।

नरकाय मतिस्ते चेत्पौरोहित्यं समाचर ।
वर्षं यावत्किमन्येन मठचिन्तां दिनत्रयम् ॥ ६२ ॥

तन्मूर्ख शोचितव्यस्त्वं गर्वं गतः । तदहं त्वदीयं मठं परित्यज्य यास्यामि । अथ तच्छ्रुत्वा भयत्रस्तमनास्ताम्रचूडस्तमुवाच । भो भगवन् मा मैवं वद । न त्वत्समोन्यो मम सुहृत्कश्चिदस्ति । परं तच्छ्रूयतां गोष्ठीशैथिल्यकारणम् । एष दुरात्मा मूषकः प्रोन्नतस्थाने धृतमपि भिक्षापात्रमुत्प्लुत्यारोहति भिक्षाशेषं च तत्रस्थं भक्षयति । तदभावादेव मठे मार्जनक्रियापि न भवति । तन्मूषकत्रासार्थमेतेन वंशेन भिक्षापात्रं मुहुर्मुहुस्ताडयामि । नान्यत्कारणमिति । अपरमेतत्कुतूहलं पश्यास्य दुरात्मनो यन्मार्जारमर्कठादयोपि तिरस्कृता

Digitized by Google

अस्योत्पतनेन बृहत्स्फगाह । अथ ज्ञायते तस्य बिलं कस्मिंस्तत्प्रदेशे । ताम्रचूड आह । भगवन् न वेद्मि सम्यक् । स आह । नूनं निधानस्योपरि तस्य बिलम् । निधानोष्मणा प्रकूर्दते । उक्तं च ।

ऊष्मापि वित्तजो वृद्धिं तेजो नयति देहिनाम् ।
किं पुनस्तस्य संभोगस्त्यागकर्मसमन्वितः ॥ ६३ ॥

तथा च ।

नाकस्मात्छाण्डिलीमाता विक्रीणाति तिलैस्तिलान् ।
लुञ्चितानितरैर्येन कार्यमत्र भविष्यति ॥ ६४ ॥

ताम्रचूड आह । कथमेतत् । स आह ।

कथा २.

यदहं कस्मिंश्चित्स्थाने प्रावृट्काले व्रतग्रहणनिमित्तं कंचिद्ब्राह्मणं वासार्थं प्रार्थितवान् । ततश्च तद्वचनात्तेनापि शुश्रूषितः सुखेन देवार्चनपरस्तिष्ठामि । अथान्यस्मिन्नहनि प्रत्यूषे प्रबुद्धोहं ब्राह्मणब्राह्मणीसंवादे दत्तावधानः शृणोमि । तत्र ब्राह्मण आह । ब्राह्मणि प्रभाते दक्षिणायनसंक्रान्तिरनन्तदानफलदा भविष्यति । तदहं प्रतिग्रहार्थं ग्रामान्तरं यास्यामि । त्वया ब्राह्मणैकस्य भगवतः सूर्यस्योद्देशेन किंचिद्भोजनं दातव्यम् । अथ तच्छ्रुत्वा ब्राह्मणी परुषतरवचनैस्तं भर्त्सयमाना प्राह । कुतस्ते दारिद्र्योपहतस्य भोजनप्राप्तिः । तत्किं न लज्जस एवं ब्रुवाणः । किंच न मया तव हस्तलग्नया क्वचिदपि लब्धं सुखं न मिष्टान्नस्यास्वादनं न च हस्तपादकण्ठादिभूषणम् । तच्छ्रुत्वा भयत्रस्तोपि विप्रो मन्दंमन्दं प्राह । ब्राह्मणि नैतद्युज्यते वक्तुम् । उक्तं च ।

ग्रासादपि तदर्धं च कस्मान्नो दीयतेर्थिषु ।

Digitized by Google

इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥ ६५ ॥
ईश्वरा भूरिदानेन वल्लभन्ते फलं किल ।
दरिद्रस्तच्च काकिण्या प्राप्नुयादिति नः श्रुतिः ॥ ६६ ॥
दाता लघुरपि सेव्यो भवति न कृपणो महानपि समृद्धा ।
कूपोन्तःस्वादुजलः प्रीत्यै लोकस्य न समुद्रः ॥ ६७ ॥

तथा च ।

अकृतत्यागमहिम्ना मिथ्या किं राजराजशब्देन ।
गोप्तारं न निधीनां कथयन्ति महेश्वरं विबुधाः ॥ ६८ ॥

अपि च ।

सदादानः परिक्षीणः शस्त एव करीश्वरः ।
अदानः पीनगात्रोपि निन्द्य एव हि गर्दभः ॥ ६९ ॥
यच्छञ्जलमपि जलदो वल्लभतामेति सकललोकस्य ।
नित्यं प्रसारितकरो मित्रोपि न वीक्षितुं शक्यः ॥ ७० ॥

एवं ज्ञात्वा दारिद्र्याभिभूतैरपि स्वल्पात्स्वल्पतरं काले पात्रे च देयम् ।

उक्तं च ।

सत्पात्रं महती श्रद्धा देशकालं यथोचितम् ।
यद्दीयते विवेकज्ञैस्तदनन्ताय कल्पते ॥ ७१ ॥

तथा च ।

अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत् ।
अतितृष्णाभिभूतस्य चूडा भवति मस्तके ॥ ७२ ॥

ब्राह्मण्याह । कथमेतत् । स आह ।

कथा ३.

अस्ति कस्मिंश्चिद्वनोद्देशे पुलिन्दः । स च पापर्द्धिं कर्तुं प्रस्थितः ।

Digitized by Google

अथ तेन प्रसर्पता महानञ्जनपर्वतशिखराकारः क्रोडः समासादितः। तं दृष्ट्वा कर्णान्ताकृष्टनिशितसायकेन समाहतः। तेनापि कोपाविष्टेन चेतसा बालेन्दुद्युतिना दंष्ट्राग्रेण पाटितोदरः पुलिन्दो गतासुर्भूतलेपतत्। अथ लुब्धकं व्यापाद्य सूकरोपि शरप्रहारवेदनया पञ्चत्वं गतः। एतस्मिन्नन्तरे कश्चिदासन्नमृत्युः शृगाल इतस्ततः परिभ्रमंस्तं प्रदेशमाजगाम। यावद्वराहपुलिन्दौ द्वावपि पश्यति तावत्प्रहृष्टो व्यचिन्तयत्। भोः सानुकूलो मे विधिः। तेनैतदप्यचिन्तितं भोजनमुपस्थितम्। अथवा साध्विदमुच्यते।

अकृतेप्युद्यमे पुंसामन्यजन्मकृतं फलम्।
शुभाशुभं सभ्येति विधिना संनियोजितम्॥ ७३॥

तथा च।

यस्मिन्देशे च काले च वयसा यादृशेन च।
कृतं शुभाशुभं कर्म तत्तथा तेन भुज्यते॥ ७४॥

तदहं तथा भक्षयामि यथा बहून्यहानि मे प्राणयात्रा भवति। तत्तावदेवं स्नायुपाशं धनुष्कोटिगतं भक्षयामि। उक्तं च।

शनैःशनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम्।
रसायनमिव प्राज्ञैर्हेलया न कदाचन॥ ७५॥

एवं मनसा निश्चित्य चापचटितकोटिं मुखे प्रक्षिप्य स्नायुं भक्षितुं प्रवृत्तः। ततश्च कर्तिते पाशे तालुदेशं विदार्य चापकोटिर्मस्तकमध्येन निष्क्रान्ता। सोपि मृतः। अतोहं ब्रवीमि।

अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत्।
अतितृष्णाभिभूतस्य चूडा भवति मस्तके॥ ७६॥

अथैवं सा तेन प्रबोधिता ब्राह्मण्याह। यद्येवं तदस्ति मे गृहे स्तो-

Digitized by Google

कतिलराशिः । ततस्तिलांल्लुञ्चित्वा तिलचूर्णेन ब्राह्मणं भोजयिष्यामीति । ततस्तद्वचनं श्रुत्वा ब्राह्मणो ग्रामं गतः । सापि तिलानुष्णोदकेन संमर्द्य कुटित्वा सूर्यातपे दत्तवती । अत्रान्तरे तस्या गृहकर्मव्यग्रायास्तिलानां मध्ये कश्चित्सारमेयो मूत्रोत्सर्गं चकार । तं दृष्ट्वा सा चिन्तितवती । अहो नैपुण्यं पश्य परावज्ञाखीभूतस्य विधेर्यदेते तिला अभोज्याः कृताः । तदहमेतान्समादाय कस्यचिद्गृहं गत्वा लुञ्चितैरलुञ्चितानानयामि । सर्वोपि जनोनेन विधिना प्रदास्यतीति । अथ यस्मिन्गृहेहं भिक्षार्थं प्रविष्टस्तत्र गृहे सापि तिलानादाय प्रविष्टा विक्रयं कर्तुम् । आह च । गृह्णातु कश्चिदलुञ्चितैर्लुञ्चितांस्तिलान् । अथ तद्गृहगृहिणी गृहं प्रविष्टा यावदलुञ्चितैर्लुञ्चितान्गृह्णाति तावदस्याः पुत्रेण कामन्दकिशास्त्रं दृष्ट्वा व्याहृतम् । मातः अग्राह्याः खल्विमे तिलाः । नास्या अलुञ्चितैर्लुञ्चिता ग्राह्याः । कारणं किंचिद्भविष्यति । तेनैषालुञ्चितैर्लुञ्चितान्प्रयच्छति । तच्छ्रुत्वा तया परित्यक्तास्ते तिलाः । अतोहं ब्रवीमि ।

नाकस्माच्छाण्डिलीमाता विक्रीणाति तिलैरितलान् ।
लुञ्चितानितरैर्येन कार्यमत्र भविष्यति ॥ ७७ ॥

एतदुक्त्वा स भूयोपि प्राह । अथ ज्ञायते तस्य क्रमणमार्गः । ताम्रचूड आह । भगवन् ज्ञायते यत एकाकी न समागच्छति । किंत्वसंख्ययूथपरिवृतः पश्यतो मे परिभ्रमन्नितस्ततः सर्वजनेन सहागच्छति याति च । अभ्यागत आह । अस्ति किंचित्खनित्रकम् । स आह । बाढमस्ति । एषा सर्वलोहमयी स्वहस्तिका । अभ्यागत आह । तर्हि प्रत्यूषे त्वया मया सह बोद्धव्यं येन द्वावपि जनचरणामलिनायां भूमौ तत्पदानुसारेण गच्छावः । मयापि तद्वचनमाकर्ण्य चिन्तितम् ।

Digitized by Google

अहो विनष्टोस्मि यतोस्य साभिप्रायवचांसि श्रूयन्ते। नूनं यथा निधानं ज्ञातं तथा दुर्गमप्यस्माकं ज्ञास्यति। एतदभिप्रायादेव ज्ञायते। उक्तं च।

सकृदपि दृष्ट्वा पुरुषं विबुधा जानन्ति सारतां तस्य।
हस्ततुलयापि निपुणाः पलप्रमाणं विजानन्ति ॥ ७८ ॥
वाञ्छैव सूचयति पूर्वतरं भविष्यं
पुंसां यदन्यतनुजं त्वशुभं शुभं वा।
विज्ञायते शिशुरजातकलापचिह्नः
प्रत्युद्गतैरपसरन्सरसः कलापी ॥ ७९ ॥

ततोहं भयत्रस्तमनाः सपरिवारो दुर्गमार्गं परित्यज्यान्यमार्गेण गन्तुं प्रवृत्तः। सपरिजनो यावदग्रतो गच्छामि तावत्संमुखो बृहत्कायो मार्जारः समायाति। स च मूषकवृन्दमवलोक्य तन्मध्ये सहसोत्पपात। अथ ते मूषका मां कुमार्गगामिनमवलोक्य गर्हयन्तो हतशेषा रुधिरप्लावितवसुंधरास्तमेव दुर्गं प्रविष्टाः। अथवा साध्विदमुच्यते।

छित्त्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद्वागुरां
पर्यन्ताग्निशिखाकलापजटिलान्निर्गत्य दूरं वनात्।
व्याधानां शरगोचरादपि जवेनोत्पत्य धावन्मृगः
कूपान्तः पतितः करोतु विधुरे किंवा विधौ पौरुषम् ॥ ८० ॥

अथाहमेकोन्यत्र गतः। शेषा मूढतया तत्रैव दुर्गे प्रविष्टाः। अत्रान्तरे स दुष्टपरिव्राजको रुधिरबिन्दुचर्चितां भूमिमवलोक्य तेनैव दुर्गमार्गेणागत्योपस्थितः। ततश्च स्वहस्तिकया खनितुमारब्धः। अथ तेन खनता प्राप्तं तन्निधानं यस्योपरि सदैवाहं कृतवसतिर्यस्योष्मणा महादुर्गमपि गच्छामि। ततो हृष्टमनास्ताम्रचूडमिदमूचेभ्या-

Digitized by Google

गतः । भो भगवन् इदानीं स्वपिहि निःशङ्कः । अस्योत्पत्तणा मूषकस्ते जागरणं करोति । एवमुक्त्वा निधानमादाय मठाभिमुखं प्रस्थितौ द्वावपि । अहमपि यावन्निधानमागच्छामि तावदरमणीयमुद्वेगकारकं तत्स्थानं वीक्षितुमपि न शक्नोमि । अचिन्तयं च । किं करोमि । क्व गच्छामि । कथं मे स्यान्मनसः प्रशान्तिः । एवं चिन्तयतो महाकष्टेन स दिवसो व्यतिक्रान्तः । अथास्तमितेर्के सोद्वेगो निरुत्साहस्तस्मिन्मठे सपरिवारः प्रविष्टः । अथास्मत्परिग्रहशब्दमाकर्ण्य ताम्रचूडोपि भूयो भिक्षापात्रं जर्जरवंशेन ताडयितुं प्रवृत्तः । अथासावभ्यागतः प्राह । सखे किमद्यापि निःशङ्को न निद्रां गच्छसि । स आह । भगवन् भूयोपि समायातः सपरिवारः स दुष्टात्मा मूषकः । तद्भयाज्जर्जरवंशेन भिक्षापात्रं ताडयामि । ततो विहस्याभ्यागतः प्राह । सखे मा भैषीः । वित्तेन सह गतोस्य कूर्दनोत्साहः । सर्वेषामपि जन्तूनामियमेव स्थितिः । उक्तं च ।

यदुत्साही सदा मर्त्यः पराभवति यज्जनान् ।
यदुद्धतं वदेद्वाक्यं तत्सर्वं वित्तजं बलम् ॥ ८१ ॥

अथाहं तच्छ्रुत्वा कोपाविष्टो भिक्षापात्रमुद्दिश्य विशेषादुत्कूर्दितो प्राप्त एव भूमौ निपतितः । तच्छ्रुत्वासौ मे शत्रुर्विहस्य ताम्रचूडमुवाच । भोः पश्य पश्य कौतूहलम् । आह च ।

अर्थेन बलवान्सर्वो अर्थयुक्तः स पण्डितः ।
पश्यैनं मूषकं व्यर्थं स्वजातेः समतां गतम् ॥ ८२ ॥

तत्स्वपिहि त्वं गतशङ्कः । यदस्योत्पतनकारणं तदावयोर्हस्तगतं जातम् । अथवा साध्विदमुच्यते ।

दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः ।

Digitized by Google

तथार्थेन विहीनोत्र पुरुषो नामधारकः ॥ ८३ ॥

तच्छ्रुत्वाहं मनसा विचिन्तितवान्। यतोङ्गुलिमात्रमपि कूर्दनशक्तिर्नास्ति तद्विगर्थहीनस्य पुरुषस्य जीवितम्। उक्तं च।

अर्थेन च विहीनस्य पुरुषस्याल्पमेधसः।
उच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥ ८४ ॥
यथा काकयवाः प्रोक्ता यथारण्यभवास्तिलाः।
नाममात्रा न सिद्धौ हि धनहीनास्तथा नराः ॥ ८५ ॥
सन्तोपि न हि राजन्ते दरिद्रस्येतरे गुणाः।
आदित्य इव भूतानां श्रीर्गुणानां प्रकाशिनी ॥ ८६ ॥
न तथा बाध्यते लोके प्रकृत्या निर्धनो जनः।
यथा द्रव्याणि संप्राप्य तैर्विहीनः सुखैधितः ॥ ८७ ॥
शुष्कस्य कीटखातस्य वह्निदग्धस्य सर्वतः।
तरोरप्यूषरस्थस्य वरं जन्म न चार्थिनः ॥ ८८ ॥
शङ्कनीया हि सर्वत्र निष्प्रतापा दरिद्रता।
उपकर्तुमपि प्राप्तं निःस्वं संत्यज्य गच्छति ॥ ८९ ॥
उन्नम्योन्नम्य तत्रैव निर्धनानां मनोरथाः।
हृदयेष्वेव लीयन्ते विधवास्त्रीस्तनाविव ॥ ९० ॥
व्यक्तेपि वासरे नित्यं दौर्गत्यतमसावृतः।
अग्रतोपि स्थितो यत्नान्न केनापीह दृश्यते ॥ ९१ ॥

एवं विलप्याहं भग्नोत्साहस्तन्निधानं गण्डोपधानीयकृतं दृष्ट्वा स्वं दुर्गं प्रभाते गतः। ततश्च मद्भृत्याः प्रभाते गच्छन्तो मिथो जल्पन्ति। अहो असमर्थोयमुदरपूरणेस्माकम्। केवलमस्य पृथुलग्नानां विडालादिविपत्तयः। तत्किमनेनाराधितेन। उक्तं च।

Digitized by Google

यत्सकाशान्न लाभः स्यात्केवलाः स्युर्विपत्तयः ।
स स्वामी दूरतस्त्याज्यो विशेषादनुजीविभिः ॥ ९२ ॥

एवं तेषां वचांसि श्रुत्वा स्वदुर्गं प्रविष्टोऽहम् । यावन्न कश्चिन्मम संमुखोभ्येति तावन्मया चिन्तितम् । धिगियं दरिद्रता । अथवा साध्विदमुच्यते ।

मृतो दरिद्रः पुरुषो मृतं मैथुनमप्रजम् ।
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ॥ ९३ ॥

एवं मे चिन्तयतस्ते भृत्या मम शत्रूणां सेवका जाताः । ते च मामेकाकिनं दृष्ट्वा विडम्बनां कुर्वन्ति । अथ मयैकाकिना योगानिद्रां गतेन भूयो विचिन्तितम् । यत्तस्य कृतपस्विनः समाश्रयं गत्वा तद्रण्डोपधानवर्तिकृतां वित्तपेटां शनैःशनैर्विदार्य तस्य निद्रावशं गतस्य स्वदुर्गे तद्वित्तमानयामि येन भूयोपि मे वित्तप्रभावेनाधिपत्यं पूर्ववद्भवति । उक्तं च ।

व्यथयन्ति परं चेतो मनोरथशतैर्जनाः ।
नानुष्ठानैर्धनैर्हीनाः कुलजा विधवा इव ॥ ९४ ॥
दौर्गत्यं देहिनां दुःखमपमानकरं परम् ।
येन स्वैरपि मन्यन्ते जीवन्तोपि मृता इव ॥ ९५ ॥
दैन्यस्य पात्रतामेति पराभूतेः परं पदम् ।
विपदामाश्रयः शश्वद्दौर्गत्यकलुषीकृतः ॥ ९६ ॥
लज्जन्ते बान्धवास्तेन संबन्धं गोपयन्ति च ।
मित्राण्यमित्रतां यान्ति यस्य न स्युः कपर्दकाः ॥ ९७ ॥
मूर्तं लाघवमेवैतदपायानामिदं गृहम् ।
पर्यायो मरणस्यायं निर्धनत्वं शरीरिणाम् ॥ ९८ ॥

Digitized by Google

अजाधूलिरिव त्रस्तैर्मार्जनीरेणुवज्जनैः ।
दीपखद्वोत्थच्छायेव त्यज्यते निर्धनो जनैः ॥ ९८ ॥
शौचावशिष्टयाप्यस्ति किंचित्कार्यं क्वचिन्मृदा ।
निर्धनेन जनेनैव न तु किंचित्प्रयोजनम् ॥ ९९ ॥
अधनो दातुकामोपि संप्राप्तो धनिनां गृहम् । 5
मन्यते याचकोयं धिग्दारिद्र्यं खलु देहिनाम् ॥ १०० ॥

अतो वित्तापहारं विदधतो यदि मे मृत्युः स्यात्तथापि शोभनम्। उक्तं च ।

स्ववित्तहरणं दृष्ट्वा यो न रक्षत्यसौ नरः ।
पितरोपि न गृह्णन्ति तद्दत्तं सलिलाञ्जलिम् ॥ १०१ ॥ 10

तथा च ।

गवार्थे ब्राह्मणार्थे च स्त्रीवित्तहरणे तथा ।
प्राणांस्त्यजति यो युद्धे तस्य लोकाः सनातनाः ॥ १०२ ॥

एवं निश्चित्य रात्रौ तत्र गत्वा निद्रावशमुपागतस्य पेटायां मया छिद्रं कृतं यावत्तावत्प्रबुद्धो दुष्टतापसः । ततश्च जर्जरवंशप्रहारेण शि- 15
रसि ताडितः कथंचिदायुःशेषतया निर्गतोहं न मृतश्च । उक्तं च ।

प्राप्तव्यमर्थं लभते मनुष्यो
देवोपि तं लङ्घयितुं न शक्तः ।
तस्मान्न शोचामि न विस्मयो मे
यदस्मदीयं न हि तत्परेषाम् ॥ १०३ ॥ 20

काककूर्मौ पृच्छतः । कथमेतत् । हिरण्यक आह ।

कथा ४.

अस्ति कस्मिंश्चिन्नगरे सागरदत्तो नाम वणिक् । तत्सूनुना रू-

Digitized by Google

पकशतेन विक्रीयमाणः पुस्तको गृहीतः । तस्मिंश्च लिखितमस्ति ।

प्राप्तव्यमर्थं लभते मनुष्यो
देवोऽपि तं लङ्घयितुं न शक्तः ।
तस्मान्न शोचामि न विस्मयो मे
यदस्मदीयं न हि तत्परेषाम् ॥ १०४ ॥

तद्दृष्ट्वा सागरदत्तेन तनुजः पृष्टः । पुत्र कियता मूल्येनैष पुस्तको गृहीतः । सोब्रवीत् । रूपकशतेन । तच्छ्रुत्वा सागरदत्तोब्रवीत् । धिङ्मूर्ख त्वं लिखितैकश्लोकं पुस्तकं रूपकशतेन यद्गृह्णास्येतया बुद्ध्या कथं द्रव्योपार्जनं करिष्यसि । तदद्यप्रभृति त्वया मे गृहे न प्रवेष्टव्यम् । एवं निर्भर्त्स्य गृहान्निःसारितः । स च तेन निर्वेदेन विप्रकृष्टं देशान्तरं गत्वा किमपि नगरमासाद्यावस्थितः । अथ कतिपयदिवसैस्तन्नगरनिवासिनां केनचिदसौ पृष्टः । कुतो भवानागतः । किंनामा त्वम् । असावब्रवीत् । प्राप्तव्यमर्थं लभते मनुष्यः । अथान्येनापि पृष्टेनानेन तथैवोत्तरं दत्तम् । एवं च तस्य नगरस्य मध्ये प्राप्तव्यमर्थ इति तस्य प्रसिद्धं नाम जातम् । अथ राजकन्या चन्द्रवती नामाभिनवरूपयौवनसंपन्ना सखीद्वितीयैकस्मिन्दिवसे नगरं निरीक्षमाणास्ति । तत्रैव च कश्चिद्राजपुत्रोतीव रूपसंपन्नो मनोरमश्च कथमपि तस्या दृष्टिगोचरे गतः । तद्दर्शनसमकालमेव कुसुमबाणाहतया तया निजसख्यभिहिता । सखि यथा किलानेन सह समागमो भवति तथाद्य त्वया यतितव्यम् । एवं च श्रुत्वा सा सखी तत्सकाशं गत्वा शीघ्रमब्रवीत् । यदहं चन्द्रवत्या तवान्तिकं प्रेषिता । भणितं च त्वां प्रति तया । यन्मम त्वद्दर्शनान्मनोभवेन एश्मिमावस्था कृता । तद्यदि शीघ्रमेव मदन्तिके न स-

Digitized by Google

मेष्यसि तदा मे मरणं शरणम् । इति श्रुत्वा तेनाभिहितम् । यद्यवश्यं मया तत्रागन्तव्यं तत्कथय केनोपायेन प्रवेष्टव्यम् । अथ सख्याभिहितम् । रात्रौ सौधावलम्बितया दृढवरत्रया त्वया तत्रारोढव्यम् । सोब्रवीत् । यद्येवं निश्चयो भवत्यास्तदहमेवं करिष्यामि । इति निश्चित्य सखी चन्द्रवतीसकाशं गता । अथागतायां रजन्यां स राजपुत्रः स्वचेतसा व्यचिन्तयत् । अहो महदकृत्यमेतत् । उक्तं च ।

गुरोः सुतां मित्रभार्यां स्वामिसेवकगेहिनीम् ।
यो गच्छति पुमांल्लोके तमाहुर्ब्रह्मघातिनम् ॥ १०५ ॥

अपरं च ।

अयशः प्राप्यते येन येन चाप्यगतिर्भवेत् ।
स्वर्गाच्च भ्रश्यते येन तत्कर्म न समाचरेत् ॥ १०६ ॥

इति सम्यग्विचार्य तत्सकाशं न जगाम । अथ प्राप्तव्यमर्थः पर्यटन्धवलगृहपार्श्वे रात्रावबलम्बितवरत्रां दृष्ट्वा कौतुकाविष्टहृदयस्तामालम्ब्याधिरूढः । तया च राजपुत्र्या स एवायमित्याश्वस्तचित्तया स्नानखादनपानाच्छादनादिना संमान्य तेन सह शयनतलमाश्रितया तदङ्गसंस्पर्शसंजातहर्षरोमाञ्चितगात्रयोक्तम् । युष्मद्दर्शनमात्रानुरक्तपा मयात्मा प्रदत्तोयम् । त्वद्वर्जमन्यो भर्ता मनस्यपि मे न भविष्यतीति । तत्कस्मान्मया सह न ब्रवीषि । सोब्रवीत् । प्राप्तव्यमर्थं लभते मनुष्यः । इत्युक्ते तयान्योयमिति मत्वा धवलगृहादुत्तार्य मुक्तः । स तु खण्डदेवकुले गत्वा सुप्तः । अथ तत्र कयाचित्स्वैरिण्या दत्तसंकेतको यावद्दण्डपाशकः प्राप्तस्तावदसौ पूर्वसुप्तस्तेन दृष्टो रहस्यसंरक्षणार्थमभिहितश्च । को भवान् । सोब्रवीत् । प्राप्तव्यमर्थं लभते मनुष्यः । इति श्रुत्वा दण्डपाशकेनाभिहितम् । यच्छून्यं देवगृहमिदम् । त-

Digitized by Google

दत्र मदीयस्थाने गत्वा स्वपिहि । तथा प्रतिपद्य स मतिविपर्यासाद-न्यशयने सुप्तः । अथ तस्य रक्षकस्य बृहत्कन्या विनयवती नाम रूपयौवनसंपन्ना कस्यापि पुरुषस्यानुरक्ता संकेतं दत्त्वा तत्र शयने सुप्तासीत् । अथ सा तमायात दृष्ट्वा स एवायमस्मद्वल्लभ इति रात्रौ घनतरान्धकारव्यामोहितोत्थाय भोजनाच्छादनादिक्रियां कारयित्वा गान्धर्वविवाहेनात्मानं विवाहयित्वा तेन समं शयने स्थिता विकसि-तवदनकमला तमाह । किमद्यापि मया सह विश्रब्धं भवान्न ब्रवी-ति । सोब्रवीत् । प्राप्तव्यमर्थं लभते मनुष्यः । इति श्रुत्वा तया चिन्ति-तम् । यत्कार्यमसमीक्षितं क्रियते तस्येदृक्फलविपाको भवतीति । एवं विमृश्य सविषादया तया निःसारितोसौ । स च यावद्वीथीमार्गेण ग-च्छति तावदन्यविषयवासी वरकीर्तिर्नाम वरो महता वाद्यशब्देनाग-च्छति । प्राप्तव्यमर्थोपि तैः समं गन्तुमारब्धः । अथ यावत्प्रत्यासन्ने लग्नसमये राजमार्गासन्नश्रेष्ठिगृहद्वारे रचितमण्डपवेदिकायां कृत-कौतुकमङ्गलवेषा वणिक्सुतास्ति तावन्मदमत्तो हस्त्यारोहकं हत्वा प्रणश्यज्जनकोलाहलेन लोकमाकुलयंस्तमेवोद्देशं प्राप्तः । तं च दृष्ट्वा सर्वे वरानुयायिनो वरेण सह प्रणश्य दिशो जग्मुः । अथास्मिन्नवसरे भयतरललोचनामेकाकिनीं कन्यामवलोक्य मा भैषीरहं परित्रातेति सुधीरं स्थिरीकृत्य दक्षिणपाणौ संगृह्य महासाहसिकतया प्राप्तव्यम-र्थः परुषवाक्यैर्हस्तिनं निर्भर्त्सितवान् । ततः कथमपि दैवयोगादप-याते हस्तिनि यावत्ससुत्तृह्वान्धबोतिक्रान्तलग्नसमये वरकीर्तिरागच्छ-ति तावत्तां कन्यामन्यहस्तगतां दृष्ट्वाभिहितम् । भोः श्वशुरक वि-रुद्धमिदं त्वयानुष्ठितं यन्मह्यं प्रदाय कन्यान्यस्मै प्रदत्तेति । सोब्रवीत् ।

भो अहमपि हस्तिभयपलायितो भवद्भिः सहायातो न जाने किमिदं

Digitized by Google

वृत्तम्। इत्यभिधाय दुहितरं प्रष्टुमारब्धः। वत्से न त्वया सुन्दरं कृतम्। तत्कथ्यतां कोयं वृत्तान्तः। साब्रवीत्। यदहमनेन प्राणसंशयाद्रक्षिता तदेनं मुक्त्वा मम जीवन्त्या नान्यः पाणिं ग्रहीष्यतीति। अनेन वार्त्ताव्यतिकरेण रजनी व्युष्टा। अथ प्रातस्तत्र संजाते महाजनसमवाये वार्त्ताव्यतिकरं श्रुत्वा राजदुहिता तद्देशमागता। कर्णपरंपरया श्रुत्वा दण्डपाशकसुतापि तत्रैवागता। अथ तं महाजनसमवायं श्रुत्वा राजापि तत्रैवाजगाम। प्राप्तव्यमर्थं प्राह। यद्विश्रब्धं कथय कीदृशोसौवृत्तान्तः। अथ सोब्रवीत्। प्राप्तव्यमर्थं लभते मनुष्य इति। राजकन्या स्मृत्वाब्रवीत्। देवोपि तं लङ्घयितुं न शक्तः। ततो दण्डपाशकसुताब्रवीत्। तस्मान्न शोचामि न विस्मयो म इति। तमखिललोकवृत्तान्तमाकर्ण्य बणिक्सुताब्रवीत्। यदस्मदीयं न हि तत्परेषामिति। अभयदानं दत्त्वा राज्ञा पृथक्पृथग्वृत्तान्ताज्ञात्वावगततत्त्वस्तस्मै प्राप्तव्यमर्थाय स्वदुहितरं सबहुमानं ग्रामसहस्रेण समं सर्वालंकारपरिवारयुतां दत्त्वा त्वं मे पुत्रोसीति नगरविदितं तं यौवराज्येभिषिक्तवान्। दण्डपाशकेनापि स्वदुहिता स्वशक्त्या वस्त्रदानादिना संभाव्य प्राप्तव्यमर्थाय प्रदत्ता। अथ प्राप्तव्यमर्थेनापि स्वीयपितृमातरौ समस्तकुटुम्बावृतौ तस्मिन्नगरे संमानपुरःसरं समानीतौ। अथ सोपि स्वगोत्रेण सह विविधभोगानुपभुञ्जानः सुखेनावस्थितः। अतोहं ब्रवीमि।

प्राप्तव्यमर्थं लभते मनुष्यो
देवोपि तं लङ्घयितुं न शक्तः।
तस्मान्न शोचामि न विस्मयो मे
यदस्मदीयं न हि तत्परेषाम्॥ १०७॥

Digitized by Google

तदेतत्सकलं सुखदुःखमनुभूय परं विषादमागतोनेन मित्रेण त्वत्सकाशमानीतः। तदेतन्मे वैराग्यकारणम्। मन्थरक आह। भद्र भवति सुहृदयमसंदिग्धं यः क्षुत्क्षामोपि शत्रुभूतं त्वां भक्षस्थाने स्थितमेवं पृष्ठमारोप्यानयति न मार्गेपि भक्षयति। उक्तं च यतः।

विकारं याति नो चित्तं वित्ते यस्य कदाचन।
मित्रस्य सुकुलीनस्य कारयेन्मित्रमुत्तमम् ॥ १०८ ॥
विद्वद्भिः सुहृदामत्र चिह्नैरेतैरसंशयम्।
परीक्षाकरणं प्रोक्तं होमाग्नेरिव पण्डितैः ॥ १०९ ॥

तथा च।

आपत्काले तु संप्राप्ते यन्मित्रं मित्रमेव तत्।
वृद्धिकाले तु संप्राप्ते दुर्जनोपि सुहृद्भवेत् ॥ ११० ॥

तन्ममाप्यद्यास्य विषये विश्वासः समुत्पन्नो यतो नीतिविरुद्धेयं मैत्री मांसाशिभिर्वायसैः सह जलचराणाम्। अथवा साध्विदमुच्यते।

मित्रं कोपि न कस्यापि नितान्तं न च वैरकृत्।
दृश्यते मित्रविध्वस्तः कार्यादेरिप्ररक्षितः ॥ १११ ॥

तत्स्वागतं भवतः। स्वगृहवदास्यतामत्र सरस्तीरे। यच्च वित्तनाशो विदेशवासश्च ते संजातस्तत्र विषये संतापो न कर्तव्यः। उक्तं च।

अभ्रच्छाया खलप्रीतिः सिद्धमन्नं च योषितः।
किंचित्कालोपभोग्यानि यौवनानि धनानि च ॥ ११२ ॥

अत एव विवेकिनो जितात्मानो धनस्पृहां न कुर्वन्ति। उक्तं च।

सुसंचितैर्जीवनवत्सुरक्षितै—

Digitized by Google

निजेऽपि देहे न वियोजितैः क्वचित् ।
पुंसो यमान्तं व्रजतोऽपि निष्ठुरै-
रेतैर्धनैः पञ्चपदी न दीयते ॥ ११३ ॥

अन्यच्च ।

यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि । 5
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् ॥ ११४ ॥
निर्दोषमपि वित्ताढ्यं दोषैर्योजयते नृपः ।
निर्धनः प्राप्तदोषोऽपि सर्वत्र निरुपद्रवः ॥ ११५ ॥
अर्थानामर्जने दुःखमर्जितानां च रक्षणे ।
नाशे दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः ॥ ११६ ॥ 10
अर्थार्थी यानि कष्टानि मूढोयं सहते जनः ।
शतांशेनापि मोक्षार्थी तानि चेन्मोक्षमाप्नुयात् ॥ ११७ ॥

अपरं विदेशवासजमपि वैराग्यं त्वया न कार्यम् । यतः

को धीरस्य मनस्विनः स्वविषयः को वै विदेशः स्मृतो
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् । 15
यद्दंष्ट्रानखलाङ्गुलप्रहरणैः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः ॥ ११८ ॥

अर्थहीनः परे देशे गतोपि यः प्रज्ञावान्भवति स कथंचिदपि न सीदति । उक्तं च ।

कोतिभारः समर्थानां किं दूरं व्यवसायिनाम् । 20
को विदेशः सुविद्यानां कः परः प्रियवादिनाम् ॥ ११९ ॥

तत्प्रज्ञानिधिर्भवान्न प्राकृतपुरुषतुल्यः । अपरं प्राप्तोप्यर्थः कर्मप्राप्त्या नश्यति । तदेतावन्ति दिनानि त्वदीयमासीत् । मुहूर्तमप्यना-

Digitized by Google

त्मीयं भोक्तुं न लभ्यते । स्वयमागतमपि विधिनापहियते ।

अर्थस्योपार्जनं कृत्वा नैव भोगं समश्नुते ।

अरण्यं महदासाद्य मूढः सोमिलको यथा ॥ १२० ॥

हिरण्यक आह । कथमेतत् । स आह ।

कथा ५.

अस्ति कस्मिंश्चिदधिष्ठाने सोमिलको नाम कौलिको वसति स्म । सोनेकविधपटरचनारञ्जितानि पार्थिवोचितानि सदैव वस्त्राण्युत्पादयति । परं तस्य चानेकविधपट्टरचनानिपुणस्यापि न भोजनाच्छादनाभ्यधिकं कथमप्यर्थमात्रं संपद्यते । अथान्ये तत्र सामान्यकौलिकाः स्थूलवस्त्रसंपादनविज्ञानिनो महर्द्धिसंपन्नाः । तानवलोक्य स स्वभार्यामाह । प्रिये पश्येतान्स्थूलपट्टकारकान्धनकनकसमृद्धान् । तदधारणकं ममैतत्स्थानं । तदन्यत्रोपार्जनाय गच्छामि । सा प्राह । भोः प्रियतम मिथ्या प्रलपितमेतद्यदन्यत्र गतानां धनं भवति स्वस्थाने न भवति । उक्तं च ।

उत्पतन्ति यदाकाशे निपतन्ति महीतले ।

पक्षिणां तदपि प्राप्त्या नादत्तमुपतिष्ठति ॥ १२१ ॥

तथा च ।

न हि भवति यन्न भाव्यं भवति च भाव्यं विनापि यत्नेन ।

करतलगतमपि नश्यति यस्य तु भवितव्यता नास्ति ॥ १२२ ॥

यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।

तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥ १२३ ॥

शेते सह शयानेन गच्छन्तमनुगच्छति ।

नराणां प्राक्तनं कर्म तिष्ठति तु सहात्मना ॥ १२४ ॥

Digitized by Google

यथा छायातपौ नित्यं सुसंबद्धौ परस्परम्।
एवं कर्म च कर्ता च संश्लिष्टावितरेतरम् ॥ १२५ ॥

तस्मादत्रैव व्यवसायपरो भव। कौलिक आह। प्रिये न सम्यगभिहितं भवत्या। व्यवसायं विना न कर्म फलति। उक्तं च।

यथैकेन न हस्तेन तालिका संप्रपद्यते।
तथोद्यमपरित्यक्तं न फलं कर्मणः स्मृतम् ॥ १२६ ॥
पश्य कर्मवशात्प्राप्तं भोज्यकालेपि भोजनम्।
हस्तोद्यमं विना वक्त्रे प्रविशेन्न कथंचन ॥ १२७ ॥

तथा च।

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवं हि दैवमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोत्र दोषः ॥ १२८ ॥

तथा च।

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य विशन्ति वदने मृगाः ॥ १२९ ॥
उद्यमेन विना राजन्न सिध्यन्ति मनोरथाः।
कातरा इति जल्पन्ति यद्भाव्यं तद्भविष्यति ॥ १३० ॥
स्वशक्त्या कुर्वतः कर्म न चेत्सिद्धिं प्रयच्छति।
नोपालभ्यः पुमांस्तत्र दैवान्तरितपौरुषः ॥ १३१ ॥

तन्मयावश्यं देशान्तरं गन्तव्यम्। इति निश्चित्य वर्धमानपुरं गत्वा तत्र वर्षत्रयं स्थित्वा सुवर्णशतत्रयोपार्जनं कृत्वा भूयः स्वगृहं प्रस्थितः। अथार्धपथे गच्छतस्तस्य कदाचिदटव्यां पर्यटतो भगवान्र-

Digitized by Google

विरस्तमुपागतः । तत्र च व्यालभयात्स्थूलतरवटस्कन्ध आरुह्य प्रसुप्तो यावत्तिष्ठति तावन्निशीथे द्वौ पुरुषौ रौद्राकारौ परस्परं जल्पन्तावशृणोत् । तत्रैक आह । भोः कर्तः त्वं किं सम्यङ्न वेत्सि यदस्य सोमिलकस्य भोजनाच्छादनादृतेधिका समृद्धिर्नास्ति । तत्किं त्वयास्य सुवर्णशतत्रयं दत्तम् । स आह । भोः कर्मन् मयावश्यं दातव्यं व्यवसायिनां तत्र च तस्य परिणतिस्त्वदायत्तेति ।

अथ यावदसौ कौलिकः प्रबुद्धः सुवर्णग्रन्थिमवलोकयति तावद्रिक्तं पश्यति । ततः साक्षेपं चिन्तयामास । अहो किमेतत् । महता कष्टेनोपार्जितं वित्तं हेलया क्वापि गतम् । तद्यर्थश्रमोकिंचनः कथं स्वपत्न्या मित्राणां च मुखं दर्शयिष्यामि । इति निश्चित्य तदेव पत्तनं गतः । तत्र च वर्षमात्रेणापि सुवर्णशतपञ्चकमुपार्ज्य भूयोपि स्वस्थानं प्रति प्रस्थितः । यावदर्धपथे भूयोटवीगतस्य भगवान्भानुरस्तंजगामाथ सुवर्णनाशभयात्सुश्रान्तोपि न विश्राम्यति केवलं कृतगृहोत्कण्ठः सत्वरं व्रजति । अत्रान्तरे द्वौ पुरुषौ तादृशौ दृष्टिदेशे समागच्छन्तौ जल्पन्तौ च शृणोति । तत्रैकः प्राह । भोः कर्तः किं त्वयैतस्य सुवर्णशतपञ्चकं दत्तम् । तत्किं न वेत्सि यद्भोजनाच्छादनाभ्यधिकमस्य किंचिन्नास्ति । स आह । भोः कर्मन् मयावश्यं देयं व्यवसायिनाम् । तस्य परिणामस्त्वदायत्तः । तत्किं मामुपालम्भयसि । तच्छ्रुत्वा सोमिलको यावद्ग्रन्थिमवलोकयति तावत्सुवर्णं नास्ति । ततः परं दुःखमापन्नो व्यचिन्तयत् । अहो किं मम धनरहितस्य जीवितेन । तदत्र वटवृक्ष आत्मानमूर्ध्व प्राणांस्त्यजामि । एवं निश्चित्य दर्भमयीं रज्जुं विधाय स्वकण्ठे पाशं नियोज्य शाखायामात्मानं निबध्य या-

Digitized by Google

वत्प्रक्षिपति तावदेकः पुमानाकाशस्थ एवेदमाह । भो भोः सोमिलक मैवं साहसं कुरु । अहं ते वित्तापहारको न ते भोजनाच्छादनाभ्यधिकं वराटिकामपि सहामि । तद्गच्छ स्वगृहं प्रति । अन्यच्च भवदीयसाहसेनाहं तुष्टः । तथा मे न स्याद्व्यर्थं दर्शनम् । तत्प्रार्थ्यतामभीष्टो वरः कश्चित् । सोमिलक आह । यद्येवं तद्देहि मे प्रभूतं धनम् । स आह । भोः किं करिष्यसि भोगरहितेन धनेन यतस्तव भोजनाच्छादनाभ्यधिका प्राप्तिरपि नास्ति । उक्तं च ।

किं तया क्रियते लक्ष्म्या या वधूरिव केवला ।
या न वेश्येव सामान्या पथिकैरुपभुज्यते ॥ १३२ ॥

सोमिलक आह । यद्यपि भोगो नास्ति तथापि भवतु मे धनम् । उक्तं च ।

कृपणोप्यकुलीनोपि सदा संश्रितमानुषैः ।
सेव्यते स नरो लोके यस्य स्याद्वित्तसंचयः ॥ १३३ ॥

तथा च ।

शिथिलौ च सुबद्धौ च पततः पततो न वा ।
निरीक्षितौ मया भद्रे दश वर्षाणि पञ्च च ॥ १३४ ॥

पुरुष आह । किमेतत् । सोब्रवीत् ।

कथा ६.

कस्मिंश्चिदधिष्ठाने तीक्ष्णविषाणो नाम महावृषभो वसति । स च मदातिरेकात्परित्यक्तनिजयूथः शृङ्गाभ्यां नदीतटानि विदारयन्स्वेच्छया मरकतसदृशानि शष्पाणि भक्षयन्नरण्यचरो बभूव । अथ तत्रैव वने प्रलोभको नाम शृगालः प्रतिवसति स्म । स कदाचित्स्वभार्यया सह नदीतीरे सुखोपविष्टस्तिष्ठति । अत्रान्तरे स तीक्ष्ण-

Digitized by Google

विषाणो जलार्थं तदेव पुलिनमवतीर्णः । ततश्च तस्य लम्बमानौ वृषणावालोक्य शृगाल्या शृगालोभिहितः । स्वामिन् पश्यास्य वृषभस्य मांसपिण्डौ लम्बमानौ यथा स्थितौ । ततः क्षणेन प्रहरेण वा पतिष्यतः । एवं ज्ञात्वा भवता पृष्ठयायिना भाव्यम् । शृगाल आह । प्रिये न ज्ञायते कदाचिदेतयोः पतनं भविष्यति वा न वा । तत्किं वृथाश्रमाय मां नियोजयसि । अत्रस्थस्तावज्जलार्थमागतान्मूषकान्भक्षयिष्यामि समं त्वया मार्गोयं यतस्तेषाम् । अथ यदा त्वां मुक्त्वास्य तीक्ष्णविषाणस्य वृषभस्य पृष्ठे गमिष्यामि तदागत्यान्यः कश्चिदेतत्स्थानं समाश्रयिष्यति । नैतदुज्यते कर्तुम् । उक्तं च ।

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥ १२५ ॥

शृगाल्याह । भोः कापुरुषस्त्वं यत्किंचित्प्राप्तं तेनापि संतोषं करोषि । उक्तं च ।

सुपूरा स्यात्कुनदिका सुपूरो मूषिकाञ्जलिः ।
सुसंतुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ॥ १२६ ॥

तस्मात्पुरुषेण सदैवोत्साहवता भाव्यम् । उक्तं च ।

यत्रोत्साहसमारम्भो यत्रालस्यविनिग्रहः ।
नयविक्रमसंयोगस्तत्र श्रीरचला ध्रुवम् ॥ १२७ ॥
तद्दैवमिति संचिन्त्य त्यजेन्नोद्योगमात्मनः ।
अनुयोगं विना तैलं तिलानां नोपजायते ॥ १२८ ॥

अन्यच्च ।

यः स्तोकेनापि संतोषं कुरुते मन्दधीर्जनः ।
तस्य भाग्यविहीनस्य दत्ता श्रीरपि मार्ज्यते ॥ १२९ ॥

Digitized by Google

यच्च त्वं वदसि । एतौ पतिष्यतो न वेति । तदप्ययुक्तम् । उक्तं च ।

कृतनिश्चयिनो बन्द्यास्तुङ्गिमा नोपभुज्यते ।
चातकः को वराकोयं यस्येन्द्रो वारिवाहकः ॥ १४० ॥

अपरं मूषकमांसस्य निर्विण्णाहम् । एतौ च मांसपिण्डौ पतनप्रायौ दृश्येते । तत्सर्वथा नान्यथा कर्तव्यमिति । अथासौ तदाकर्ण्य मूषक- 5
प्राप्तिस्थानं परित्यज्य तीक्ष्णविषाणस्य पृष्ठमन्वगच्छत् । अथवा साध्विदमुच्यते ।

तावत्स्यात्सर्वकृत्येषु पुरुषोत्र स्वयं प्रभुः ।
स्त्रीवाक्याङ्कुशविक्षुण्णो यावन्नो ध्रियते बलात् ॥ १४१ ॥
अकृत्यं मन्यते कृत्यमगम्यं मन्यते सुगम् । 10
अभक्ष्यं मन्यते भक्ष्यं स्त्रीवाक्यप्रेरितो नरः ॥ १४२ ॥

एवं स तस्य पृष्ठतः सभार्यः परिश्रमंश्चिरकालमनयत् । न च तयोः पतनमभूत् । ततश्च निर्वेदात्पञ्चदशे वर्षे शृगालः स्वभार्यामाह ।

शिथिलौ च सुबद्धौ च पततः पततो न वा ।
निरीक्षितौ मया भद्रे दश वर्षाणि पञ्च च ॥ १४३ ॥ 15

तयोस्तत्पश्चादापे पातो न भविष्यति । तत्तदेव स्वस्थानं गच्छावः अतोहं ब्रवीमि ।

शिथिलौ च सुबद्धौ च पततः पततो न वा ।
निरीक्षितौ मया भद्रे दश वर्षाणि पञ्च च ॥ १४४ ॥

पुरुष आह । यद्येवं तद्गच्छ भूयोपि वर्धमानपुरम् । तत्र द्वौ ब- 20
णिक्पुत्रौ वसतः । एको गुप्तधनः । द्वितीय उपभुक्तधनः । ततस्तयोः स्वरूपं बुद्ध्वैकस्य वरः प्रार्थनीयः । यदि ते धनेन प्रयोजनमभक्षितेन ततस्त्वामपि गुप्तधनं करोमि । अथवा दत्तभोग्येन धनेन ते प्रयोज-

Digitized by Google

नं तदुपभुक्तधनं करोमीति । एवमुक्त्वादर्शनं गतः । सोमिलकोपि विस्मितमना भूयोपि वर्धमानपुरं गतः । अथ संध्यासमये श्रान्तः कथमपि तत्पुरं प्राप्तो गुप्तधनगृहं पृच्छन्कृच्छ्राल्लब्ध्वास्तमितसूर्ये प्रविष्टः । अथासौ भार्यापुत्रसमेतेन गुप्तधनेन निर्भर्त्स्यमानो हटाद्गृहं प्रविश्योपविष्टः । ततश्च भोजनवेलायां तस्यापि भक्तिवर्जितं किंचिदशनं दत्तम् । ततश्च भुक्त्वा तत्रैव यावत्सुप्तो निशीथे पश्यति तावत्तावपि द्वौ पुरुषौ परस्परं मन्त्रयतः । तत्रैक आह । भोः कर्तः किं त्वयास्य गुप्तधनस्यान्योधिको व्ययो निर्मितो यत्सोमिलकस्यानेन भोजनं दत्तम् । तदयुक्तं त्वया कृतम् । स आह । भोः कर्मन् न ममात्र दोषः । मया पुरुषस्य लाभप्राप्तिर्दर्शितव्या । तत्परिणतिः पुनस्त्वदायत्तेति । अथासौ यावदुत्तिष्ठति तावद्गुप्तधनो विसूचिकया खिद्यमानो रुजाभिभूतः क्षणं तिष्ठति । ततो द्वितीयेद्युः तद्दोषेण कृतोपवासः संजातः । सोमिलकोपि प्रभाते तद्गृहान्निष्क्रम्योपभुक्तधनगृहं गतः । तेनापि चाभ्युत्थानादिना सत्कृतो विहितभोजनाच्छादनसंमानस्तस्यैव गृहे भव्यशय्यामास्थाय सुष्वाप । ततश्च निशीथे यावत्पश्यति तावत्तावेव द्वौ पुरुषौ मिथो मन्त्रयतः । अत्र तयोरेक आह । भोः कर्तः अनेन सोमिलकस्योपकारं कुर्वता प्रभूतो व्ययः कृतः । तत्कथय कथमस्योद्धारकविधिर्भविष्यति । अनेन सर्वमेतद्व्यवहारकगृहात्समानीतम् । स आह । भोः कर्मन् मम कृत्यमेतत् । परिणतिस्त्वदायत्तेति । अथ प्रभातसमये राजपुरुषो राजप्रसादनं वित्तमादाय समायात उपभुक्तधनाय समर्पयामास । तद्दृष्ट्वा सोमिलकश्चिन्तयामास । संचयरहितोपि वरमेष उपभुक्तधनो नासौ गुप्तधनः । उक्तं च ।

अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतम् ।

Digitized by Google

रतिपुत्रफला दारा दत्तभुक्तफलं धनम् ॥ १४५ ॥

तद्विधाता मां दत्तभुक्तधनं करोतु । न कार्यं मे गुप्तधनेन । ततः सोमिलको दत्तभुक्तधनः संजातः । अतोहं ब्रवीमि ।

अर्थस्योपार्जनं कृत्वा नैव भोगं समश्नुते ।
अरण्यं महदासाद्य मूढः सोमिलको यथा ॥ 5

तद्भद्र हिरण्यक एवं ज्ञात्वा धनविषये संतापो न कार्यः । अथ विद्यमानमपि धनं भोज्यबन्ध्यतया तदविद्यमानं मन्तव्यम् ।

उक्तं च ।

गृहमध्यनिखातेन धनेन धनिनो यदि ।
भवामः किं न तेनैव धनेन धनिनो वयम् ॥ १४६ ॥ 10

तथा च ।

उपार्जितानामर्थानां त्याग एव हि रक्षणम् ।
तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥ १४७ ॥

अन्यच्च ।

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य । 15
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ १४८ ॥

एवं ज्ञात्वा विवेकिना न स्थित्यर्थं वित्तोपार्जनं कर्तव्यं यतो दुःखाय तत् । उक्तं च ।

संतोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥ १४९ ॥ 20
पीयूषमिव संतोषं पिबतां निर्वृतिः परा ।
दुःखं निरन्तरं पुंसामसंतोषवतां पुनः ॥ १५० ॥
निरोधाच्चेतसोक्षाणि निरुद्धान्यखिलान्यपि

Digitized by Google

आच्छादिते रवौ मेघैः संछन्नाः स्युर्गभस्तयः ॥ १५१ ॥
वाञ्छाविच्छेदनं प्राहुः स्वास्थ्यं शान्ता महर्षयः ।
वाञ्छा निवर्तते नार्थैः पिपासेवाग्निसेवनैः ॥ १५२ ॥
अनिन्द्यमपि निन्दन्ति स्तुवन्त्यस्तुत्यमुच्चकैः ।
स्वापतेयकृते मर्त्याः किं किं नाम न कुर्वते ॥ १५३ ॥
धर्मार्थं यस्य वित्तेहा तस्यापि न शुभावहा ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ १५४ ॥
दानेन तुल्यो निधिरस्ति नान्यो
लोभाच्च नान्योस्ति परः पृथिव्याम् ।
विभूषणं शीलसमं न चान्यत्
संतोषतुल्यं धनमस्ति नान्यत् ॥ १५५ ॥
दारिद्र्यस्य परा मूर्तिर्यन्मानद्रविणाल्पता ।
जरद्गवधनः शर्वस्तथापि परमेश्वरः ॥ १५६ ॥

एवं ज्ञात्वा भद्र त्वया संतोषः कार्य इति । मन्थरकवचनमाकर्ण्य वायस आह । भद्र मन्थरको यदेवं वदति तत्त्वया चित्ते कर्तव्यम् । अथवा साध्विदमुच्यते ।

सुलभाः पुरुषा राजन्सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ १५७ ॥
अप्रियाण्यपि पथ्यानि ये वदन्ति नृणामिह ।
त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः ॥ १५८ ॥

अथैवं जल्पतां तेषां चित्राङ्गो नाम हरिणो लुब्धकत्रासितस्तस्मिन्नेव सरसि प्रविष्टः । अथायान्तं ससंभ्रममवलोक्य लघुपतनको वृक्षमारूढः । हिरण्यकः शरस्तम्बं प्रविष्टः । मन्थरकः सलिलाशय-

Digitized by Google

मास्थितः। अथ लघुपतनको मृगं सम्यक्परिज्ञाय मन्थरकमुवाच। एह्येहि सखे मन्थरक मृगोयं तृषार्त्तोत्र समायातः सरसि प्रविष्टः। तस्य शब्दोयं न मानुषसंभव इति। तच्छ्रुत्वा मन्थरको देशकालोचितमाह। भो लघुपतनक यथायं मृगो दृश्यते प्रभूतमुच्छ्वासमुद्वहन्नुद्भ्रान्तदृष्ट्या पृष्ठतोवलोकयति तन्न तृषार्त्त एष नूनं लुब्धकत्रासितः। तज्ज्ञायतामस्य पृष्ठे लुब्धका आगच्छन्ति न वेति। उक्तं च।

भयत्रस्तो नरः श्वासं प्रभूतं कुरुते मुहुः।
दिशोवलोकयत्येव न स्वास्थ्यं व्रजति क्वचित् ॥ १५९ ॥

तच्छ्रुत्वा चित्राङ्ग आह। भो मन्थरक ज्ञातं त्वया सम्यङ्मे त्रासकारणम्। अहं लुब्धकशरप्रहारादुद्धारितः कृच्छ्रेणात्र समायातः। मम यूथं तैर्लुब्धकैर्व्यापादितं भविष्यति। तच्छरणागतस्य मे दर्शय किंचिदगम्यं स्थानं लुब्धकानाम्। तदाकर्ण्य मन्थरक आह। भोश्चित्राङ्ग श्रूयतां नीतिशास्त्रम्।

द्वावुपायाविह प्रोक्तौ विमुक्तौ शत्रुदर्शने।
हस्तयोश्चालनादेको द्वितीयः पादवेगजः ॥ १६० ॥

तद्गम्यतां शीघ्रं घनं वनं यावदद्यापि नागच्छन्ति ते दुरात्मानो लुब्धकाः। अत्रान्तरे लघुपतनकः सत्वरमभ्युपेत्योवाच। भो मन्थरक गतास्ते लुब्धकाः स्वगृहोन्मुखाः प्रचुरमांसपिण्डधारिणः। तच्चित्राङ्ग त्वं विश्रब्धो जलाद्बहिर्भव। ततस्ते चत्वारोपि मित्रभावमाश्रितास्तस्मिन्सरसि मध्याह्नसमये वृक्षच्छायाधस्तात्सुभाषितगोष्ठीसुखमनुभवन्तः सुखेन कालं नयन्ति। अथवा युक्तमेतदुच्यते।

सुभाषितरसास्वादबद्धरोमाञ्चकञ्चुकम्।
विनापि संगमं स्त्रीणां कवीनां सुखमेधते ॥ १६१ ॥

Digitized by Google

तथा च ।

सकृदुक्तं न गृह्णाति स्वयं वा न करोति यः ।
यस्य संपुटिका नास्ति कुतस्तस्य सुभाषितम् ॥ १६२ ॥

अथैकस्मिन्नहनि गोष्ठीसमये मृगो नायातः । अथ ते व्याकुलीभूताः परस्परं जल्पितुमारब्धाः । अहो किमद्य सुहृन्न समायातः । किं सिंहादिभिः क्वचिद्व्यापादित उत लुब्धकैरथवानले प्रपतितो गर्तावि षमे वा नवतृणलौल्यादिति । अथवा साध्विदमुच्यते ।

स्वगृहोद्यानगतेपि स्निग्धैः पापं विशङ्क्यते मोहात् ।
किमु दृष्टबहुपायप्रतिभयकान्तारमध्यस्थे ॥ १६३ ॥

अथ मन्थरको वायसमाह । भो लघुपतनक अहं हिरण्यकश्च तावद्वावप्यशक्तौ तस्यान्वेषणं कर्तुं मन्दगतित्वात् । तद्गत्वा त्वमरण्यं शोधय यदि कुत्रचित्तं जीवन्तं पश्यसीति । तदाकर्ण्य लघुपतनको नातिदूरे यावद्गच्छति तावत्पल्वलतीरे चित्राङ्गः कूटपाशनियन्त्रितस्तिष्ठति । तं दृष्ट्वा शोकव्याकुलितमनास्तमवोचत् । भद्र किमिदम् । चित्राङ्गेपि वायसमवलोक्य विशेषेण दुःखितमना बभूव ।

अथवा युक्तमेतत् ।

अपि मन्दत्वमापन्नो नष्टो वापीष्टदर्शनात् ।
प्रायेण प्राणिनां भूयो दुःखावेगोधिकोभवेत् ॥ १६४ ॥

ततश्च बाष्पावसाने चित्राङ्गो लघुपतनकमाह । भो मित्र संजातोयं तावन्मम मृत्युः । तद्युक्तं संपन्नं यद्भवता सह मे दर्शनं संजातम् । उक्तं च ।

प्राणात्यये समुत्पन्ने यदि स्यान्मित्रदर्शनम् ।
तद्वाभ्यां सुखदं पश्चाज्जीवतोपि मृतस्य च ॥ १६५ ॥

Digitized by Google

तत्क्षन्तव्यं यन्मया प्रणयात्सुभाषितगोष्ठीष्वभिहितम् । तथा हिरण्यकमन्थरकौ मम वाक्याद्वाच्यौ ।

अज्ञानाज्ज्ञानतो वापि दुरुक्तं यदुदाहृतम् ।
मया तत्क्षम्यतामद्य द्वाभ्यामपि प्रसादतः ॥ १६६ ॥

तच्छ्रुत्वा लघुपतनक आह । भद्र न भेतव्यमस्मद्विधैर्मित्रैर्विद्यमानैः । यावदहं द्रुततरं हिरण्यकं गृहीत्वागच्छामि । अपरं ये सत्पुरुषा भवन्ति ते व्यसने न व्याकुलत्वमुपयान्ति । उक्तं च ।

संपदि यस्य न हर्षो विपदि विषादो रणे न भीरुत्वम् ।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ॥ १६७ ॥

एवमुक्त्वा लघुपतनकश्चित्राङ्गमाश्वास्य यत्र हिरण्यकमन्थरकौ तिष्ठतस्तत्र गत्वा सर्वं चित्राङ्गपाशपतनं कथितवान् । हिरण्यकं च चित्राङ्गपाशमोक्षणं प्रति कृतनिश्चयं पृष्ठमारोप्य भूयोपि सत्वरं चित्राङ्गसमीपे गतः । सोपि मूषकमवलोक्य किंचिज्जीविताशया संश्लिष्ट आह ।

आपन्नाशाय विबुधैः कर्तव्याः सुहृदोमलाः ।
न तरत्यापदं कश्चिद्योत्र मित्रविवर्जितः ॥ १६८ ॥

हिरण्यक आह । भद्र त्वं तावन्नीतिशास्त्रज्ञो दक्ष इति । तत्कथमत्र कूटपाशे पतितः । स आह । भो न कालोयं विवादस्य । तन्न यावत्स पापात्मा लुब्धकः समभ्येति तावद्द्रुततरं कर्तयेमं मत्पादपाशम् । तदाकर्ण्य विहस्याह हिरण्यकः । किं मय्यपि समायाते लुब्धकाद्बिभेषि । ततः शास्त्रं प्रति महती मे विरक्तिः संपन्ना यद्भवद्विधा अपि नीतिशास्त्रविद एतामवस्थां प्राप्नुवन्ति । तेन त्वां पृच्छामि । स आह । भद्र कर्मणा बुद्धिरपि हन्यते । उक्तं च ।

Digitized by Google

कृतान्तपाशबद्धानां दैवोपहतचेतसाम् ।
बुद्धयः कुब्जगामिन्यो भवन्ति महतामपि ॥ १६९ ॥
विधात्रा रचिता या सा ललाटेक्षरमालिका ।
न तां मार्जयितुं शक्ताः स्वशक्त्याप्यतिपण्डिताः ॥ १७० ॥

एवं तयोः प्रवदतोः सुदृद्व्यसनसंतप्तहृदयो मन्थरकः शनैःशनैस्तं प्रदेशमाजगाम । तं दृष्ट्वा लघुपतनको हिरण्यकमाह । अहो न शोभनमापतितम् । हिरण्यक आह । किं स लुब्धकः समायाति । स आह । आस्तां तावल्लुब्धकवार्ता । एष मन्थरकः समागच्छति । तदनीतिरनुष्ठितानेन यतो वयमप्यस्य कारणान्नूनं व्यापादनं यास्यामो यदि स पापात्मा लुब्धकः समागमिष्यति । तदहं तावत्खमुत्पतिष्यामि । त्वं पुनर्बिलं प्रविश्यात्मानं रक्षयिष्यसि । चित्राङ्गोपि वेगेन दिगन्तरं यास्यति । एष पुनर्जलचरः स्थले कथं भविष्यतीति व्याकुलोस्मि । अत्रान्तरे प्राप्तोयं मन्थरकः । हिरण्यक आह । भद्र न युक्तमनुष्ठितं भवता यदत्र समायातः । तद्भूयोपि द्रुततरं गम्यतां यावदसौ लुब्धको न समायाति । मन्थरक आह । भद्र किं करोमि । न शक्नोमि तत्रस्थो मित्रव्यसनाग्निदाघं सोढुम् । तेनाहमत्रागतः । अथवा साध्विदमुच्यते ।

दयितजनविप्रयोगो वित्तवियोगश्च केन सह्याः स्युः ।
यदि सुमहौषधकल्पो वयस्यजनसंगमो न स्यात् ॥ १७१ ॥

एवं तस्य प्रवदत आकर्णपूरितशरासनो लुब्धकोप्युपागतः । तं दृष्ट्वा मूषकेण तस्य स्नायुपाशस्तत्क्षणात्खण्डितः । अत्रान्तरे चित्राङ्गः सत्वरं पृष्ठमवलोकयन्प्रधावितः । लघुपतनको वृक्षमारूढः । हिरण्यकश्च समीपवर्ति बिलं प्रविष्टः । अथासौ लुब्धको मृगगमनाद्विषण्ण-

Digitized by Google

वदनो व्यर्थश्रमस्तं मन्थरकं मन्दंमन्दं स्थलमध्ये गच्छन्तं दृष्टवान्। अचिन्तयच्च। यद्यपि कुरंगो धात्रापत्तृतस्तथाप्ययं कूर्म आहारार्थं संपादितः। तदद्यास्यामिषेण मे कुटुम्बस्याहारनिर्वृत्तिर्भविष्यति। एवं विचिन्त्य तं दर्भैः संछाद्य धनुषि समारोप्य स्कन्धे कृत्वा गृहं प्रति प्रस्थितः। अत्रान्तरे तं नीयमानमवलोक्य हिरण्यको दुःखाकुलः पर्यदेवयत्। कष्टं भोः कष्टमापतितम्।

एकस्य दुःखस्य न यावदन्तं
गच्छाम्यहं पारमिवार्णवस्य।
तावद्द्वितीयं समुपस्थितं मे
छिद्रेष्वनर्था बहुलीभवन्ति॥ १७२॥

यदि तावत्कृतान्तेन मे धननाशो विहितस्तन्मार्गश्रान्तस्य मे विश्रामभूतं मित्रं कस्मादपत्तृतम्। अपरमपि मित्रं परं मन्थरकसमं न स्यात्। उक्तं च।

असंपत्तौ परो लाभो गुह्यस्य कथनं तथा।
आपद्विमोक्षणं चैव मित्रस्यैतत्फलत्रयम्॥ १७३॥

तदस्य पश्चान्नान्यः सुहृन्मे। तत्किं ममोपर्यनवरतं व्यसनशरैर्वर्षति हन्त विधिः। यत आदौ तावद्वित्तनाशस्ततः परिवारभ्रंशस्ततो देशत्यागस्ततो मित्रवियोग इति। अथवा स्वरूपमेतत्सर्वेषामेव जन्तूनां जीवितधर्मस्य। उक्तं च।

कायः संनिहितापायः संपदः पदमापदाम्।
समागमाः सापगमाः सर्वमुत्पादभङ्गुरम्॥ १७४॥

तथा च।

क्षते प्रहारा निपतन्त्यभीक्ष्णं

धनक्षये वर्धति जाठराग्निः ।
आपत्सु वैराणि समुद्भवन्ति
च्छिद्रेष्वनर्था बहुलीभवन्ति ॥ १७५ ॥
अहो साधूक्तं केनापि ।
प्राप्ते भये परित्राणं प्रीतिविश्रम्भभाजनम् ।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥ १७६ ॥

अत्रान्तर आक्रन्दपरौ चित्राङ्गलघुपतनकौ तत्रैव समायातौ । अथ हिरण्यक आह । अहो किं वृथाप्रलपितेन । तद्यावदेष मन्थरको दृष्टिगोचरान्न नीयते तावदस्य मोक्षोपायश्चिन्त्यतामिति । उक्तं च ।

व्यसनं प्राप्य यो मोहात्केवलं परिदेवयेत् ।
क्रन्दनं वर्धयत्येव तस्यान्तं नाधिगच्छति ॥ १७७ ॥
केवलं व्यसनस्योक्तं भेषजं नयपण्डितैः ।
तस्योच्छेदसमारम्भो विषादपरिवर्जनम् ॥ १७८ ॥

अन्यच्च ।

अतीतलाभस्य च रक्षणार्थं
भविष्यलाभस्य च संगमार्थम् ।
आपत्प्रपन्नस्य च मोक्षणार्थं
यन्मन्त्र्यतेसौ परमो हि मन्त्रः ॥ १७९ ॥

तच्छ्रुत्वा वायस आह । भो यद्येवं तत्क्रियतां मद्वचः । एष चित्राङ्गोस्य मार्गे गत्वा किंचित्पल्वलमासाद्य तस्य तीरे निश्चेतनो भूत्वा पततु । अहमप्यस्य शिरसि समारुह्य मन्दैश्चञ्चुप्रहारैः शिर उल्लेखिष्यामि येनासौ लुब्धकोमुं मृतं मत्वा मम चञ्चुप्रहारप्रत्ययेन

Digitized by Google

मन्थरकं भूमौ क्षिप्त्वा मृगार्थं धावति। अत्रान्तरे त्वया दर्भमयबन्धनवेष्टनानि खण्डनीयानि येनासौ मन्थरको द्रुततरं पल्वलं प्रविशति। चित्राङ्गः प्राह। भो भद्रोयं दृष्टो मन्त्रस्त्वया। नूनं मन्थरको मुक्तो मन्तव्यः। उक्तं च।

सिद्धिं वा यदिवासिद्धिं चित्तोत्साहो निवेदयेत्। 5
प्रथमं सर्वजन्तूनां प्राज्ञो वेत्ति न चेतरः॥ १८०॥

तत्तदेवं क्रियताम्। तथानुष्ठिते स लुब्धकस्तथैव मार्गासन्नपल्वलतीरस्थं चित्राङ्गं वायससनाथमद्राक्षीत्। तं दृष्ट्वा हर्षितमना व्यचिन्तयत्। नूनं पाशवेदनया वराकोयं मृगो गत्वायुःशेषजीवितः पाशं त्रोटयित्वा कथमप्येतद्वनान्तरं प्रविष्टो यावन्मृतः। तद्वरयोयं 10 मे कच्छपः सुयन्त्रितत्वात्। तदेनमपि तावद्गृह्णामित्यवधार्य कच्छपं भूतले प्रक्षिप्य मृगमुपाद्रवत्। अत्रान्तरे हिरण्यकेन वज्रोपमदंष्ट्राप्रहारेण तद्बन्धनं तत्क्षणात्खण्डशः कृतम्। मन्थरकोपि तृणमध्यान्निष्क्रम्य पल्वलं प्रविष्टः। चित्राङ्गोप्यप्राप्तस्यापि तस्योत्थाय वायसेन सह द्रुतं प्रनष्टः। अत्रान्तरे विलक्षो विषादपरो निवृत्तो 15 लुब्धको यावत्पश्यति तावत्कच्छपोपि गतः। ततश्च तत्रोपविश्येमं श्लोकमपठत्।

प्राप्तो बन्धनमप्ययं गुरु मृगस्तावत्त्वया मे हृतः
संप्राप्तः कमठः स चापि नियतं नष्टस्तवादेशतः।
क्षुत्क्षामोत्र वने भ्रमामि शिशुकैस्त्यक्तः समं भार्यया 20
यत्स्वामिन्न कृतं कृतान्त कुरु रे तत्रापि सज्जोस्म्यहम्॥१८१॥

एवं बहुविधं विलप्य स्वगृहं गतः। अथ तस्मिन्दूरीभूते सर्वेपि ते काककूर्ममृगाखवः परमानन्दभाजो मिलित्वा परस्परमालि-

Digitized by Google

ङ्क्त्वा पुनर्जातानिवात्मनो मन्यमानास्तदेव सरः प्राप्य महासुखेन सुभाषितगोष्ठीविनोदं कुर्वन्तः कालं नयन्ति स्म। एवं ज्ञात्वा विवेकिना मित्रसंग्रहः कार्यः। तथा मित्रेण सहाव्याजेन वर्तितव्यम्। उक्तं च।

यो मित्राणि करोत्यन्यत्कौटिल्येन न वर्तते।
स दुःखं न पराभूतेः प्राप्नोति हि कथंचन ॥ १८२ ॥

॥ समाप्तं चेदं मित्रसंप्राप्त्यभिधानं द्वितीयं तन्त्रम् ॥

Digitized by Google

अथेदमारभ्यते काकोलूकीयं नाम तृतीयं तन्त्रं यस्यायमादिमः श्लोकः ।

न विश्वसेत्पूर्वविरोधितस्य
शत्रोश्चमित्रत्वमुपागतस्य ।
दृष्टा गुहां पश्य उलूकपूर्णां
काकप्रणीतेन हुताशनेन ॥ १ ॥

तद्यथानुश्रूयते ।

अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तस्य समीपेनेकखगसनाथोतिघनतरपत्रच्छन्नो महान्न्यग्रोधपादपस्तिष्ठति । तत्र च मेघवर्णो नाम वायसराजोनेककाकपरिवारः प्रतिवसति स्म । स तत्र विहितदुर्गरचनः सपरिजनः कालं नयति । अथान्योरिमर्दनो नामोलूकराजोसंख्योलूकपरिवृतो गिरिगुहादुर्गाश्रयः प्रतिवसति स्म । स च रात्रावागत्य तस्य न्यग्रोधस्य समन्तात्परिभ्रमति । यं कंचिद्वायसमासादयति तं व्यापादयति । एवं नित्याभिगमनाच्छनैःशनैस्तन्न्यग्रोधपादपदुर्गं निर्वायसं कृतम् । अथवा भवत्येवं यतः ।

य उपेक्षते शत्रुं स्वं प्रचरन्तं यदृच्छया ।
रोगं बालस्यसंयुक्तः स शनैस्तेन हन्यते ॥ २ ।

तथा च ।

जातमात्रं न यः शत्रुं व्याधिं च प्रशमं नयेत् ।
महाबलोपि तेनैव वृद्धिं प्राप्य स हन्यते ॥ ३ ॥

Digitized by Google

अथान्येद्युः स वायसराजः सर्वान्सचिवानाहूय प्रोवाच। भो उत्कटस्तावदस्माकं शत्रुरुद्यमसंपन्नश्च कालविन्नित्यमेव निशागमे समेत्य व्यापादनं करोति । तत्कथमस्य प्रतिविधातव्यम् । वयं तावद्रात्रौ न पश्यामो न च तस्य दुर्गं विजानीमो येन गत्वा प्रहरामः । तदत्र किं युज्यते संधिविग्रहयानासनसंश्रयद्वैधीभावानामेकतमस्य क्रियमाणस्य । अथ ते प्रोचुः । युक्तमभिहितं देवेन यदेष प्रश्नः कृतः । उक्तं च ।

अपृष्टेनापि वक्तव्यं सचिवेनात्र किंचन ।
पृष्टेन त्वरितं पथ्यं वाच्यं च प्रियमप्रियम् ॥ ४ ॥
यो न पृष्टो हितं ब्रूते परिणामे सुखावहम् ।
मन्त्री च प्रियवक्ता च केवलं स रिपुः स्मृतः ॥ ५ ॥
सुलभाः पुरुषा राजन्सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ ६ ॥
तस्मादेकान्तमासाद्य मन्त्रः कार्यो महीपते ।
येन तस्य वयं कुर्मो नियमं कारणं तथा ॥ ७ ॥

अथ तस्यान्वयगताः पञ्च सचिवाः । तद्यथा नामानि । उज्जीवी संजीव्यनुजीवी प्रजीवी चिरंजीवी च । स तेषामादौ तावदुज्जीविनं पृष्टवान् । भद्र एवं स्थिते किं मन्यते भवान् । स आह । राजन् बलवता सह विग्रहो न कार्यः । यतः स बलवान्कालप्रहर्ता च तस्मात्संधेयः । उक्तं च ।

बलीयसि प्रणमतां काले प्रहरतामपि ।
संपदो नापगच्छन्ति प्रतीप इव निम्नगाः ॥ ८ ॥
सत्याढ्यो धार्मिकश्चार्यो भ्रातृसंघातवान्बली ।

Digitized by Google

अनेकविजयी चैव संधेयः स रिपुर्भवेत् ॥ ९ ॥
संधिः कार्योऽप्यनार्येण विज्ञाय प्राणसंशयम् ।
प्राणैः संरक्षितैः सर्वं यतो भवति रक्षितम् ॥ १० ॥
योनेकयुद्धीविजयी स तेन विशेषात्संधेयः । उक्तं च ।
अनेकयुद्धविजयी संधानं यस्य गच्छति । 5
तत्प्रभावेन तस्याशु वशमायान्त्यरातयः ॥ ११ ॥
संधिमिच्छेत्समेनापि संदिग्धो विजयो युधि ।
न हि सांशयिकं कुर्यादित्युवाच बृहस्पतिः ॥ १२ ॥
संदिग्धो विजयो नित्यं द्यूतेनापि हि युध्यताम् ।
उपायत्रितयादूर्ध्वं तस्माद्युद्धं समाचरेत् ॥ १३ ॥ 10
असंदधानो मानान्धः समेनापि हतो भृशम् ।
आमकुम्भ इवान्येन करोत्युभयसंक्षयम् ॥ १४ ॥
समं शक्तिमता युद्धमशक्तस्य हि मृत्यवे ।
दृषत्कुम्भमिवाभित्त्वा तावत्तिष्ठति शक्तिमान् ॥ १५ ॥
भूमिर्मित्रं हिरण्यं च विग्रहस्य फलत्रयम् । 15
नास्त्येकमपि यद्येषां विग्रहं न समाचरेत् ॥ १६ ॥
खनन्नाखुबिलं सिंहः पाषाणशकलाकुलम् ।
प्राप्नोति नखभङ्गं हि फलं वा मूषको भवेत् ॥ १७ ॥
तस्मान्न स्यात्फलं यत्र पुष्कं युद्धं च केवलम् ।
न हि तत्स्वयमुत्पाद्यं कर्तव्यं च कथंचन ॥ १८ ॥ 20
बलीयसा समाक्रान्तो वैतसीं वृत्तिमाश्रयेत् ।
वाञ्छन्नभ्रंशिनीं लक्ष्मीं न भौजंगीं कदाचन ॥ १९ ॥
कुर्वन्हि वैतसीं वृत्तिं प्राप्नोति महतीं श्रियम् ।

Digitized by Google

भुजंगवृत्तिः प्राप्नोति वधमेव हि केवलम् ॥ २० ॥
कूर्मसंकोचमास्थाय प्राहारानपि मर्षयेत् ।
कालेकाले च मतिमानुत्तिष्ठेत्कृष्णसर्पवत् ॥ २१ ॥
आगतं विग्रहं दृष्ट्वा सुसान्त्वा प्रशमं नयेत् ।
विजयस्य ह्यनित्यत्वाद्रभसा न समुत्पतेत् ॥ २२ ॥

तथा च ।

बलिना सह योद्धव्यमिति नास्ति निदर्शनम् ।
प्रतिवातं न हि घनः कदाचिदुपसर्पति ॥ २३ ॥

एवमुज्जीवी साममन्त्रं संधिकारकं विज्ञप्तवान् । अथ तच्छ्रुत्वा संजीविनमाह । भद्र तवाभिप्रायं श्रोतुमिच्छामि । स आह । देव न ममैतत्प्रतिभाति यच्छत्रुणा सह संधानं क्रियते । उक्तं च ।

शत्रुणा न हि संदध्यात्सुश्लिष्टेनापि संधिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ २४ ॥

अपरं च स क्रूरो लुब्धो धर्मरहितः । तत्त्वया विशेषादसंधेयः । उक्तं च ।

सत्यधर्मविहीनेन न संदध्यात्कथंचन ।
सुसंधितोप्यसाधुत्वादचिराद्याति विक्रियाम् ॥ २५ ॥

तस्मात्तेन योद्धव्यमिति मे निश्चयः । उक्तं च ।

क्रूरो लुब्धोलसोसत्यः प्रमादी भीरुरुत्थितः ।
मूढो योधावमन्ता च सुखोच्छेद्यो भवेद्रिपुः ॥ २६ ॥

अपरं पराभूतास्तेन वयम् । तद्यदि संधानं करिष्यथ तद्ध्रुवोपि काकविनाशं करिष्यति । उक्तं च ।

Digitized by Google

चतुर्थोपायसाध्ये तु शत्रौ शान्त्यमपक्रिया ।
स्वेद्यमानज्वरं प्राज्ञः कोष्मसा परिषिञ्चति ॥ २७ ॥
सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः ।
सुतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः ॥ २८ ॥

यच्चैतद्ददति देवो रिपुर्बलवांस्तदप्यकारणम् । उक्तं च । 5

प्रमाणभ्यधिकस्यापि महत्सत्त्वमधिष्ठितः ।
पदं मूर्ध्नि समाधत्ते केशरी मत्तदन्तिनः ॥ २९ ॥
उत्साहशक्तिसंपन्नो हन्याच्छत्रुं लघुर्गुरुम् ।
यथा कण्ठीरवो नागं भारद्वाजाः प्रचक्षते ॥ ३० ॥
मायया शत्रवो वध्या अधिकाः स्युर्बलेन ये । 10
यथा स्त्रीरूपमास्थाय हता भीमेन कीचकाः ॥ ३१ ॥

तथा च ।

मृत्योरिवोग्रदण्डस्य राज्ञो यान्ति वशं द्विषः ।
सर्वंसहं तु मन्यन्ते तृणाय रिपवश्च तम् ॥ ३२ ॥
न जातु शमनं यस्य तेजस्तेजस्विनेजसाम् । 15
वृथाजातेन किं तेन मातुर्यौवनहारिणा ॥ ३३ ॥
या लक्ष्मीर्नानुलिप्ताङ्गी वैरिशोणितकुङ्कुमैः ।
कान्तापि मनसः प्रीतिं न सा धत्ते मनस्विनाम् ॥ ३४ ॥
रिपुरक्तेन संसिक्ता तत्स्त्रीनेत्राम्बुभिस्तथा ।
न भूमिर्यस्य भूपस्य का श्लाघा तस्य जीविते ॥ ३५ ॥ 20

एवं संजीवी विग्रहमन्त्रं विज्ञापयामास। अथ तच्छ्रुत्वानुजीविनमाह । भद्र त्वमपि स्वाभिप्रायं वद । स आह देव दुष्टः स बलाधिको निर्मर्यादश्च । तत्र तेन न संधिर्न विग्रहो युक्तः । केवलं यानम-

Digitized by Google

हैं स्यात् । उक्तं च ।

बलोत्कृष्टेन दुष्टेन मर्यादारहितेन च ।
न संधिर्विग्रहो नैव विना यानं प्रशस्यते ॥ ३६ ॥
द्विधाकारं भवेद्यानं भये प्राणार्थरक्षणम् ।
एकमन्यज्जिगीषोश्च यात्रालक्षणमुच्यते ॥ ३७ ॥
कार्तिके वाथ चैत्रे वा विजिगीषोः प्रशस्यते ।
यानमुत्कृष्टवीर्यस्य शत्रुदेशे न चान्यदा ॥ ३८ ॥
अवस्कन्दप्रदानस्य सर्वे कालाः प्रकीर्तिताः ।
व्यसने वर्तमानस्य शत्रोश्छिद्रान्वितस्य च ॥ ३९ ॥
स्वस्थानं सुदृढं कृत्वा शूरैश्चाप्तैर्महाबलैः ।
परदेशं ततो गच्छेत्प्रणिधिव्याप्तमग्रतः ॥ ४० ॥
अज्ञातवीवधासारतोयसस्यो व्रजेत्तु यः ।
परराष्ट्रं न भूयः स स्वराष्ट्रमपि गच्छति ॥ ४१ ॥

तत्ते युक्तं कर्तुमपसरणम् । अन्यच्च ।

तत्र युक्तं प्रभो कर्तुं द्वितीयं यानमेव च ।
न विग्रहो न संधानं बलिना तेन पापिना ॥ ४२ ॥

अपरं कारणापेक्षया सरणं क्रियते बुधैः । उक्तं च ।

यदपसरति मेषः कारणं तत्र हर्तुं
मृगपतिरतिकोपात्संकुचत्युत्पतिष्णुः ।
हृदयनिहितभावा गूढमन्त्रप्रचाराः
किमपि विगणयन्तो बुद्धिमन्तः सहन्ते ॥ ४३ ॥

अन्यच्च ।

बलवन्तं रिपुं दृष्ट्वा देशत्यागं करोति यः ।

Digitized by Google

युधिष्ठिर इवाप्नोति पुनर्जीवन्स मेदिनीम् ॥ ४४ ॥
युध्यतेऽकृतिं कृत्वा दुर्बलो यो बलीयसा ।
स तस्य वाञ्छितं कुर्यादात्मनश्च कुलक्षयम् ॥ ४५ ॥

तद्बलवताभियुक्तस्यापसरणसमयोयं न संधिर्विग्रहश्च । एवमनुजीविमन्त्रोपसरणस्य । अथैतदाकर्ण्य प्रजीविनमाह । भद्र त्वमप्यात्मनोभिप्रायं वद । स आह । देव मम संधिविग्रहयानान्यपि त्रीण्येव न प्रतिभान्ति विशेषतश्चासनम् ।

उक्तं च ।

नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानाच्छुनापि परिभूयते ॥ ४६ ॥

अन्यच्च ।

अभियुक्तो बलवता दुर्गे तिष्ठेत्प्रयत्नवान् ।
तत्रस्थः सुहृदाह्वानं प्रकुर्वीतात्ममुक्तये ॥ ४७ ॥
यो रिपोरागमं श्रुत्वा भयसंत्रस्तमानसः ।
स्वस्थानं हि त्यजेत्तत्र न तु भूयो विशेच्च सः ॥ ४८ ॥
दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः ।
स्थानहीनस्तथा राजा गम्यः स्यात्सर्वजन्तुषु ॥ ४९ ॥
निजस्थानस्थितोप्येकः शतं योद्धुं सहेश्वरः ।
बलिनामपि शत्रूणां तस्मात्स्थानं न संत्यजेत् ॥ ५० ॥
तस्माद्दुर्गं दृढं कृत्वा बीजधानसारसंयुतम् ।
प्राकारपरिखायुक्तं यन्त्रादिभिरलंकृतम् ॥ ५१ ॥
तिष्ठेन्मध्यगतो नित्यं युद्धाय कृतनिश्चयः ।
जीवन्संप्राप्स्यति राज्यं मृतो वा स्वर्गमेष्यति ॥ ५२ ॥

Digitized by Google

अन्यच्च ।

बलिनापि न बाध्यन्ते लघवोप्येकसंश्रयाः ।
प्रभञ्जनविपक्षेण यथैकस्था महीरुहः ॥ ५३ ॥
महानप्येकजो वृक्षः सर्वतः सुप्रतिष्ठितः ।
सुमन्देनापि वातेन शक्यो धूनयितुं यतः ॥ ५४ ॥
एवं मनुष्यमप्येकं शौर्यैणापि समन्वितम् ।
शक्यं द्विषन्तो मन्यन्ते हिंसन्ति च ततः परम् ॥ ५५ ॥

एवं प्रजीविमन्त्रः । इदमासनसंज्ञकम् । एतत्समाकर्ण्य चिरंजीविनमाह । भद्र त्वमपि स्वाभिप्रायं वद । स आह । देव षाड्गुण्यमध्ये मम संश्रयः प्रतिभाति । तस्यानुष्ठानं कार्यम् । उक्तं च ।

असहायः समर्थोपि तेजस्वी किं करिष्यति ।
निर्वाते ज्वलितो वह्निः स्वयमेव प्रशाम्यति ॥ ५६ ॥

तदत्रैव स्थितेन त्वया कश्चित्समर्थ आश्रयणीयो यो विपत्प्रतीकारं करोति । यदि पुनस्त्वं तव स्थानं त्यक्त्वा प्रयास्यसि तत्कोपि ते वाङ्मात्रेणापि सहायत्वं न करिष्यति । उक्तं च ।

वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति गौरवम् ॥ ५७ ॥

अथवा नैष एकान्तो यद्बलिनमेकं समाश्रयेत् । लघूनामपि संश्रयो रक्षायै भवति । उक्तं च ।

संघातवान्यथा वेणुर्निबिडैर्वेणुभिर्वृतः ।
न शक्यते समुच्छेत्तुं दुर्बलोपि तथा नृपः ॥ ५८ ॥
अथ ये संहता वृक्षाः सर्वतः सुप्रतिष्ठिताः ।
ते न रौद्रानिलेनापि हन्यन्तेन्योन्यसंश्रयात् ॥ ५९

Digitized by Google

महानप्येकजो वृक्षो बलवान्सुप्रतिष्ठितः ।
प्रसह्य इव वातेन शक्यः स्यादपि मर्दितुम् ॥ ६० ॥
यदि पुनरुत्तमे संश्रयो भवति तत्किमुच्यते । उक्तं च ।
महाजनस्य संपर्कः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम् ॥ ६१ ॥

ततः संश्रयं विना न कश्चित्प्रतीकारो भवति । तस्मात्संश्रयास्कार्यो विग्रह इति मेभिप्रायः । एवं चिरंजीविमन्त्रः । अथैवं तेनाभिहिते स मेघवर्णो राजा चिरंतनं पितृसचिवं दीर्घायुषं सकलनीतिपारं गतं स्थिरजीविनामानं प्रणम्य प्रोवाच । तात यदेते मया पृष्टाः सचिवास्तावदत्र स्थितस्यापि तव तत्परीक्षार्थं येन त्वं सकलं श्रुत्वा यदुचितं तन्मे समादिशसि । तदद्युक्तं भवति तत्समादेश्यम् । स आह । वत्स सर्वैरप्येतैर्नीतिशास्त्राश्रयमुक्तं सचिवैः । तदुपयुज्यते स्वकाले । परमेष द्वैधीभावस्य कालः । उक्तं च ।

अविश्वासं सदा तिष्ठेत्संधिना विग्रहेण च ।
द्वैधीभावं च संश्रित्य पार्श्वे शत्रोर्बलीयसः ॥ ६२ ॥

तच्छत्रुं विश्वास्याविश्वस्तैर्लोभं दर्शयद्भिः सुखेनोच्छिद्यते रिपुः । उक्तं च ।

उच्छेद्यमपि विद्वांसो वर्धयन्त्यरिमेकदा ।
गुडेन वर्धितः श्लेष्मा सुखं वृद्ध्या निपात्यते ॥ ६३ ॥

तथा च ।

स्त्रीणां शत्रोः कुमित्रस्य पण्यस्त्रीणां विशेषतः ।
यो भवेदेकभावोत्र न स जीवति मानवः ॥ ६४ ॥
कृत्यं देवद्विजातीनामात्मनश्च गुरोस्तथा ।

Digitized by Google

एकभावेन कर्तव्यं शेषं द्विर्भावमाश्रितैः ॥ ६५ ॥

एको भावः सदा शस्तो यतीनां भावितात्मनाम् ।

स्त्रीलुब्धानां न लोकानां विशेषेण महीभृताम् ॥ ६६ ॥

तद्वैधीभावं संश्रितस्य तव स्वस्थाने वासो भविष्यते लोभाश्रयाच्च शत्रुमुच्चाटयिष्यसि । अपरं यदि किंचिच्छिद्रं तस्य पश्यसि तद्गत्वा व्यापादयिष्यसि । मेघवर्ण आह । तात मयाविदितः संश्रयस्तस्य । तत्कथं छिद्रं ज्ञायते तस्य । स्थिरजीव्याह । वत्स न केवलं स्थानं छिद्राण्यपि तस्य प्रकटीकरिष्यामि प्रणिधिभिः । उक्तं च ।

गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति वै द्विजाः ।

चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ ६७ ॥

उक्तं चात्र विषये ।

यस्तीर्थानि निजे पक्षे परपक्षे विशेषतः ।

गुप्तैश्चारैर्नृपो वेत्ति न स दुर्गतिमाप्नुयात् ॥ ६८ ॥

मेघवर्ण आह । तात कानि तीर्थान्युच्यन्ते कतिसंख्यानि च । कीदृशा गुप्तचराः । तत्सर्वं निवेद्यतामिति । स आह । अत्र विषये भगवता नारदेन युधिष्ठिरः प्रोक्तः । यच्छत्रुपक्षेष्टादश तीर्थानि स्वपक्षे पञ्चदश । त्रिभिस्त्रिभिर्गुप्तचरैस्तानि ज्ञेयानि । तैर्ज्ञातैः स्वपक्षः परपक्षश्च वशयो भवति । उक्तं च नारदेन युधिष्ठिरं प्रति ।

काञ्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च ।

त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ॥ ६९ ॥

तीर्थशब्देनायुक्तकर्माभिधीयते । तदादे तेषां कुत्सितं भवति तत्स्वामिनोभिघाताय । प्रधानं भवति तद्वृद्धये स्यादिति । तद्यथा । मन्त्री पुरोहितः सेनापतिर्युवराजो दौवारिकोन्तर्वासिकः प्रशासकः

Digitized by Google

समाहर्तृसंनिधातृप्रदेष्टृज्ञापकाः साधनाध्यक्षो गजाध्यक्षः कोशाध्यक्षो दुर्गपालकरपालसीमापालप्रोत्कटभृत्याः । एषां भेदेन द्वाग्रिपुः साध्यते । स्वपक्षे च देवी जननी कञ्चुकी मालिकः शय्यापालकः स्पाशः सांवत्सरिको भिषग्जलवाहकस्ताम्बूलवाहकाचार्यावङ्गरक्षकः स्थानचिन्तकश्छत्रधरो विलासिनी । एषां वैरद्वारेण स्वपक्षे विघातः । 5

तथा च ।

वैद्यसांवत्सरिकाचार्याः स्वपक्षेधिकृताश्वराः ।
यथाहितुण्डिकोन्मत्ताः सर्वं जानन्ति शत्रुषु ॥ ७० ॥

तथा च ।

कृत्वा कृत्यविदस्तीर्थैरन्तः प्रणिधयः पदम् । 10
विदांकुर्वन्तु महतस्तलं विद्विषदम्भसः ॥ ७१ ॥

एवं मन्त्रिवाक्यमाकर्ण्यात्रान्तरे मेघवर्ण आह । तात अथ किंनिमित्तमेवंविधं प्राणान्तिकं सदैव वायसोलूकानां वैरम् । स आह । वत्स कदाचिद्धंसशुकबककोकिलचातकोलूकमयूरकपोतपारावतविष्किरप्रभृतयः सर्वेपि पक्षिणः समेत्य सोद्वेगं मन्त्रयितुमारब्धाः । 15 अहो अस्माकं वैनतेयो राजा स च तावच्छ्रीवासुदेवासक्तो नास्माकं कामपि चिन्तां करोति । तत्किं तेन वृथास्वामिना यो लुब्धकपाशैर्नित्यं निबध्यमानानां न रक्षां विधत्ते । उक्तं च ।

यो न रक्षति वित्रस्तान्पीड्यमानान्परैः सदा ।
जन्तून्पार्थिवरूपेण स कृतान्तो न संशयः ॥ ७२ ॥ 20
यदि न स्यान्नरपतिः सम्यङ्नेता इमाः प्रजाः ।
अकर्णधारा पुरुषा विप्लवन्ते ह नौरिव ॥ ७३ ॥
षाडिमान्पुरुषो जह्याद्विन्नां नावमिवार्णवे ।

Digitized by Google

अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥ ७४ ॥
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ॥ ७५ ॥

तत्संचिन्त्यान्यः कश्चिद्राजा विहंगमानां क्रियतामिति । अथ तैर्भद्राकारमुलूकमवलोक्य सर्वैरभिहितम् । यदेव उलूको राजास्माकं भविष्यति । तदानीयन्तां नृपाभिषेकसंबन्धिनः संभारा इति । अथ साधिते विविधतीर्थोदके प्रगुणीकृतेष्टोत्तरशतमूलिकासंघाते प्रदत्ते सिंहासने वर्तिते सप्तद्वीपवतीधरित्रीमण्डले प्रस्तारिते व्याघ्रचर्मण्यापूरितेषु हेमकुम्भेषु दीपेषु वाद्येषु च सज्जीकृतेषु दर्पणादिषु माङ्गल्यवस्तुषु पठत्सु वन्दिमुख्येषु वेदोच्चारणपरेषु समुदितमुखेषु ब्राह्मणेषु गीतपरे युवतीजन आनीतायामग्रमहिष्यां कृकालिकायामुलूकोभिषेकार्थं यावत्सिंहासन उपविशति तावत्कुतोपि वायसः समायातः । सोचिन्तयत् । अहो किमेष पक्षिमेलापको महोत्सवश्च । अथ ते पक्षिणस्तं दृष्ट्वा मिथः प्रोचुः । पक्षिणां मध्ये वायसश्चतुरः श्रूयते । उक्तं च ।

नराणां नापितो धूर्तः पक्षिणां चैव वायसः ।
दंष्ट्रिणां च शृगालस्तु श्वेतभिक्षुस्तपस्विनाम् ॥ ७६ ॥

तदस्यापि वचनं ग्राह्यम् । उक्तं च ।

बहुधा बहुभिः सार्धं चिन्तिताः सुनिरूपिताः ।
कथंचिन्न विलीयन्ते विद्वद्भिश्चिन्तिता नयाः ॥ ७७ ॥

अथ वायसः समेत्य तानाह । अहो किं महाजनसमागमोयं परममहोत्सवश्च । ते प्रोचुः । भो नास्ति कश्चिद्विहंगानां राजा । तदस्योलूकस्य विहंगराजाभिषेको निरूपितस्तिष्ठति समस्तपक्षिभिः । तत्त्व-

Digitized by Google

मापि मतं देहि । प्रस्तावे समागतोसि । अथासौ काको विहस्याह । अहो न युक्तमेतद्यन्मयूरहंसकोकिलचक्रवाकशुकहारीतसारसादिषु पक्षिप्रधानेषु विद्यमानेषु दिवान्धस्यास्य करालवक्त्रस्याभिषेकः क्रियते । तन्नैतन्मम मतम् । यतः ।

वक्रनासश्च कर्काक्षो रौद्रश्चाप्रियदर्शनः । 5
अक्रुद्धोयं दिवान्धः स्याक्रुद्धः कीदृग्भविष्यति ॥ ७८ ॥

तथा च ।

स्वभावरौद्रमत्युग्रं क्रूरमप्रियदर्शनम् ।
उलूकं नृपतिं कृत्वा का नः सिद्धिर्भविष्यति ॥ ७९ ॥

अपरं वैनतेये स्वामिनि स्थिते किमेष दिवान्धः स्वामी क्रियते । 10 तदद्यापि गुणवान्भवति तथाप्येकस्मिन्स्वामिनि स्थिते नान्यो भूपः प्रशस्यते ।

एक एव हितार्थो यस्तेजस्वी पार्थिवो भुवः ।
युगान्त इव भास्वन्तो बहवोत्र विपत्तये ॥ ८० ॥

तत्तस्य नाम्नापि यूयं परेषामगम्या भविष्यथ । उक्तं च । 15

गुरूणां नाममात्रेपि गृहीतेस्वामिसंभवे ।
दुष्टानां पुरतः क्षेमं तत्क्षणादेव जायते ॥ ८१ ॥

तथा च ।

व्यपदेशेन महतां सिद्धिः संजायते परा ।
शशिनो व्यपदेशेन वसन्ति शशकाः सुखम् ॥ ८२ ॥ 20

त ऊचुः । कथमेतत् । स आह ।

कथा १

अस्ति कस्मिंश्चिद्वने चतुर्दन्तो नाम महागजो यूथाधिपः प्रतिव-

Digitized by Google

सति स्म । तत्र कदाचिन्महत्यनावृष्टिः संजाता प्रभूतवर्षाणि यावत् । तया तडागह्रदपल्वलसरांसि शोषमुपागतानि । अथ तैः समस्तगजैः स गजराजः प्रोक्तः । देव पिपासाकुला गजकलभा मृतप्राया अपरे मृताश्च । तदन्विष्यतां कश्चिज्जलाशयो यत्र जलपानेन स्वस्थतां व्रजन्ति । ततश्चिरं ध्यात्वा तेनाभिहितम् । अस्ति महान्ह्रदो विविक्ते प्रदेशे स्थलमध्यगतः पातालगङ्गाजलेन सदैव पूर्णः । तत्तत्र गम्यतामिति । तथानुष्ठिते पञ्चरात्रमुपसर्पद्भिः समासादितस्तैः सह्रदः । तत्र स्वेच्छया जलमवगाह्यास्तमनवेलायां निष्क्रान्ताः । तस्य च ह्रदस्य समन्ताच्छशकबिला असंख्याः सुकोमलभूमौ तिष्ठन्ति । तेपि समस्तैरपि तैर्गजैरितस्ततो भ्रमद्भिः परिभग्नाः । बहवः शशका भग्नपादशिरोग्रीवा विहिताः केचिन्मृताः केचिज्जीवशेषा जाताः । अथ गते तस्मिन्गजयूथे शशकाः सोद्वेगा गजपादक्षुण्णसमावासाः केचिद्भग्नपादा अन्ये जर्जरितकलेवरा रुधिरप्लुता अन्ये हतशिशवो वाष्पपिहितलोचनाः समेत्य मिथो मन्त्रं चक्रुः । अहो विनष्टा वयम् । नित्यमेवैतद्गजयूथमागमिष्यति यतो नान्यत्र जलमस्ति । तत्सर्वेषां नाशो भविष्यति । उक्तं च ।

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजंगमः ।
हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः ॥ ८३ ॥

तच्चिन्त्यतां कश्चिदुपायः । तत्रैकः प्रोवाच । गम्यतां देशत्यागेन । किमन्यत् । उक्तं च मनुना व्यासेन च ।

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ ८४ ॥

मनुः ।

Digitized by Google

क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीमपि ।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन् ॥ ८५ ॥
आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ ८६ ॥

ततश्चान्ये प्रोचुः । भोः पितृपैतामहं स्थानं न शक्यते सहसा त्य- 5
क्तुम् । तत्क्रियतां तेषां कृते काचिद्विभीषिका यत्कथमपि दैवान्न समायान्ति । उक्तं च ।

निर्विषेणापि सर्पेण कर्तव्या महती फटा ।
विषं भवतु मा वास्तु फटाटोपो भयंकरः ॥ ८७ ॥

अथान्ये प्रोचुः । यद्येवं ततस्तेषां महद्विभीषिकास्थानमस्ति येन 10
नागमिष्यन्ति । सा च चतुरदूतायत्ता विभीषिका । यतो विजयदत्तो नाम राजास्मत्स्वामी शशकश्चन्द्रमण्डले निवसति तत्प्रेष्यतां कश्चिन्मिथ्यादूतो यूथाधिपसकाशं यच्चन्द्रस्त्वामत्र ह्रद आगच्छन्तं निषेधयति यतोस्मत्परिग्रहोस्य समन्तादसति । एवमभिहिते श्रद्धेयवचनात्कदापि निवर्तते । अथान्ये प्रोचुः । यद्येवं तदस्ति लम्बकर्णो नाम शशकः । स च वचनरचनाचतुरो दूतकर्मज्ञः । स तत्र प्रेष्यतामिति । उक्तं च । 15

साकारो निःस्पृहो वाग्मी नानाशास्त्रविचक्षणः ।
परचित्तावगन्ता च राज्ञो दूतः स इष्यते ॥ ८८ ॥

अन्यच्च । 20

यो मूर्खं लौल्यसंपन्नं राजद्वारिकमाचरेत् ।
मिथ्यावादं विशेषेण तस्य कार्यं न सिध्यति ॥ ८९ ॥

तदन्विष्यतां यद्यस्माद्व्यसनादात्मनां सुनिर्मुक्तिः । अथान्ये प्रोचुः ।

Digitized by Google

अहो युक्तमेतत् । नान्यः कश्चिदुपायोस्माकं जीवितस्य । तथैव क्रियताम् । अथ लम्बकर्णो गजयूथाधिपसमीपे निरूपितो गतश्च । तथानुष्ठिते लम्बकर्णोपि गजमार्गमासाद्यागम्यं स्थलमारुह्य तं गजमुवाच । भो भो दुष्टगज किमेवं लीलया निःशङ्कतयात्र चन्द्रह्रद आगच्छसि । तन्नागन्तव्यं निवर्त्यतामिति । तदाकर्ण्य विस्मितमना गज आह । भोः कस्त्वम् । स आह । अहं विजयदत्तो नाम शशकश्चन्द्रमण्डले वसामि । सांप्रतं भगवता चन्द्रमसा तव पार्श्वे प्रहितस्तस्य वचनस्य श्रद्धेयत्वात् । तच्छ्रुत्वा स आह । भोः शशक तत्कथय भगवतश्चन्द्रमसः संदेशं येन सत्वरं क्रियते । स आह । भवतातीतदिवसे यूथेन सहागच्छता प्रभूताः शशका निपातिताः । तत्किं न वेत्ति भवान्यन्मम परिग्रहोयम् । तद्यदि जीवितेन ते प्रयोजनं तदा केनापि प्रयोजनेनाप्यत्र ह्रदे नागन्तव्यमिति संदेशः । गज आह । अथ क्व वर्तते भगवान्स्वामी चन्द्रः । स आह । अत्र ह्रदे सांप्रतं शशकानां भवद्यूथमथितानां हतशेषाणां समाश्वासनाय समायातस्तिष्ठति । अहं पुनस्तवान्तिकं प्रेषितः । गज आह । यद्येवं तद्दर्शय मे तं स्वामिनं येन प्रणम्यान्यत्र गच्छामः । शशक आह । भो आगच्छ मया सहैकाकी येन दर्शयामि । तथानुष्ठिते शशको निशासमये तं गजं ह्रदतीरे नीत्वा जलमध्ये स्थितं चन्द्रबिम्बमदर्शयत् । आह च । भो एष नः स्वामी जलमध्ये समाधिस्थोस्तिष्ठति तन्निभृतं प्रणम्य सत्वरं व्रजेति । नो चेत्समाधिभङ्गाद्यूयोपि प्रभूतं कोपं करिष्यति । अथ गजोपि त्रस्तमनास्तं प्रणम्य पुनर्गमनाय प्रस्थितः शशकाश्च तद्दिनादारभ्य सपरिवाराः सुखेन स्वेषु स्थानेषु तिष्ठन्ति स्म । अतोहं ब्रवीमि ।

Digitized by Google

व्यपदेशेन महतां सिद्धिः संजायते परा ।
शशिनो व्यपदेशेन वसन्ति शशकाः सुखम् ॥ ९० ॥

तथा च ।

क्षुद्रमर्थपतिं प्राप्य न्यायान्वेषणतत्परौ ।
उभावपि क्षयं प्राप्तौ पुरा शशकपिञ्जलौ ॥ ९१ ॥

ते प्रोचुः । कथमेतत् । स आह ।

कथा २.

अस्ति कस्मिंश्चिद्वृक्षे पुराहं वसामि । तत्राधस्तात्कोटरे कपिञ्जलो नाम चटकः प्रतिवसति स्म । अथ सदैवास्तमनवेलायामागतयोर्द्वयोरनेकसुभाषितगोष्ठ्या देवर्षिब्रह्मर्षिराजर्षिपुराणचरितकीर्तनेन च पर्यटनदृष्टानेककौतूहलप्रकथनेन च परमसुखमनुभवतोः कालो व्रजति । अथ कदाचित्कपिञ्जलः प्राणयात्रार्थमन्यैश्चटकैः सहाग्र्यं पक्वशालिग्रामं देशं गतः । ततो यावन्निशासमयेपि नायातस्तावदहं सोद्वेगमनास्तद्वियोगदुःखितश्चिन्तितवान् । अहो किमद्य कपिञ्जलो नायातः । किं केनापि पाशेन बद्धः उताहोस्वित्केनापि व्यापादितः । सर्वथा यदि कुशली भवति तन्मां विना न तिष्ठति । एवं मे चिन्तयतो बहून्यहानि व्यतिक्रान्तानि । ततश्च तत्र कोटरे कदाचिच्छीघ्रगो नाम शशकोस्तमनवेलायामागत्य प्रविष्टः । मयापि कपिञ्जलनिराशत्वेन न निवारितः । अथान्यस्मिन्नहनि कपिञ्जलः शालिभक्षणातीव पीवरतनुः स्वमाश्रयं स्मृत्वा भूयोप्यत्रैव समायातः । अथवा साध्विदमुच्यते ।

न तादृग्नीयते सौख्यमपि स्वर्गे शरीरिणाम् ।

Digitized by Google

दरिद्रेपि हि यादृक्स्यात्स्वदेशे स्वपुरे गृहे ॥ ९२ ॥

अथासौ कोटरान्तर्गतं शशकं दृष्ट्वा साक्षेपमाह । भो मदीयमेतद्गृहम् । तच्छीघ्रं निष्क्रम्यताम् । शशक आह । न तवेदं गृहं किंतु ममैव । तत्किं मिथ्या परुषाणि जल्पसि । उक्तं च ।

वापीकूपतडागानां देवालयकुजन्मनाम् ।
उत्सर्गात्परतः स्वाम्यमपि कर्तुं न शक्यते ॥ ९३ ॥

तथा च ।

प्रत्यक्षं यस्य यद्युक्तं गृहाद्यं दश वत्सरान् ।
तत्र भुक्तिः प्रमाणं स्यान्न साक्षी नाक्षराणि च ॥ ९४ ॥
मानुषाणामयं न्यायो मुनिभिः परिकीर्तितः ।
तिरश्चां च विहंगानां यावच्छिशुसमाश्रयः ॥ ९५ ॥

तन्ममैतद्गृहं न तवेति । कपिञ्जल आह । भो यदि स्मृतं प्रमाणीकरोषि तदागच्छ मया सह येन स्मृतिपाठकं पृष्ट्वा स यस्य ददाति स गृह्णातु । तथानुष्ठिते मयापि चिन्तितम् । किमत्र भविष्यति । मया द्रष्टव्योयं न्यायः । ततः कौतुकादहमपि तावन्न प्रस्थितः । अत्रान्तरे तीक्ष्णदंष्ट्रो नामारण्यमार्जारस्तयोर्विवादं श्रुत्वा मार्गासन्नं नदीतटमासाद्य कृतकुशोपग्रहो निमीलितैकनयन ऊर्ध्वबाहुरर्धपादस्पृष्टभूमिः श्रीसूर्याभिमुख इमां धर्मदेशनामकरोत् । अहो असारोयं संसारः । क्षणभङ्गुराः प्राणाः । स्वप्नसदृशः प्रियसमागमः । इन्द्रजालवत्कुटुम्बपरिग्रहोयम् । तद्धर्मं मुक्त्वा नान्या गतिरस्ति । उक्तं च ।

यस्य धर्मविहीनानि दिनान्यायान्ति यान्ति च ।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥ ९६ ॥
नाच्छादयति कौपीनं नदंशमशकापहम् ।

Digitized by Google

शुनः पुच्छमिवानर्थं पाण्डित्यं धर्मवर्जितम् ॥ ९७ ॥

अन्यच्च ।

पुलका इव धान्येषु पूतिका इव पक्षिषु ।
मशका इव मर्त्येषु येषां धर्मो न कारणम् ॥ ९८ ॥
श्रेयः पुष्पफलं वृक्षाद्वध्रः श्रेयो घृतं स्मृतम् ।
श्रेयस्तैलं च पिण्याकाच्छ्रेयान्धर्मस्तु मानुषात् ॥ ९९ ॥
सृष्टा मूत्रपुरीषार्थमाहाराय च केवलम् ।
धर्महीनाः परार्थाय पुरुषाः पशवो यथा ॥ १०० ॥
स्थैर्यं सर्वेषु कृत्येषु शंसन्ति नयपण्डिताः ।
बल्हन्तरायायुक्तस्य धर्मस्य त्वरिता गतिः ॥ १०१ ॥
संक्षेपात्कथ्यते धर्मो जनाः किं विस्तरेण वः ।
परोपकारः पुण्याय पापाय परपीडनम् ॥ १०२ ॥
श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ १०३ ॥

अथ तस्य तां धर्मदेशनां श्रुत्वा शशक आह । भोः कपिञ्जल एष नदीतीरे तपस्वी धर्मवादी तिष्ठति । तदेनं पृच्छावः । कपिञ्जल आह । ननु स्वभावतोयमस्माकं शत्रुभूतः । तद्दूरे स्थित्वा पृच्छावः । कदाचिदस्य व्रतवैकल्यं संपत्स्यते । ततो दूरस्थौ तावूचतुः । भोस्तपस्विन्धर्मदेशक आवयोर्विवादो वर्तते । तद्धर्मशास्त्रद्वारेणास्माकं निर्णयं देहि । यो हीनवादी स ते भक्ष्य इति । स आह । भद्रौ मा मैवं वदतः । निवृत्तोहं नरकमार्गाद्धिंसाकर्मणः । अहिंसैव धर्ममार्गः । उक्तं च ।

अहिंसापूर्वको धर्मो यस्मात्सद्भिरुदाहृतः ।

Digitized by Google

वृकमत्कुणदंशादींस्तस्मात्तानपि रक्षयेत् ॥ १०४ ॥
हिंसकान्येव भूतानि यो हिनस्ति स निर्घृणः ।
स याति नरकं घोरं किं पुनर्यः शुभानि च ॥ १०५ ॥

एते ये याज्ञिका अपि यज्ञकर्मणि पशून्घ्नन्ति ते मूर्खाः । परमार्थं श्रुतेर्न जानन्ति । तत्र किलैतदुक्तं यदजैर्यष्टव्यम् । अजा व्रीहयस्तावत्सप्तवार्षिकाः कथ्यन्ते न पुनः पशुविशेषाः । उक्तं च ।

वृक्षांश्छित्त्वा पशून्हत्वा कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गे नरकं केन गम्यते ॥ १०६ ॥

तन्नाहं भक्षयिष्यामि । जयपराजयनिर्णयं करिष्यामि । परं वृद्धोहं दूरान्न यथावच्छृणोमि । एवं ज्ञात्वा समीपवर्तिनौ भूत्वा विवादं वदतं येन मे विज्ञातपरमार्थं विवादं वदतः परस्परं न विरुध्यते । उक्तं च ।

मानाद्वा यदि वा लोभात्क्रोधाद्वा यदि वा भयात् ।
यो न्यायमन्यथा ब्रूते स याति नरकं नरः ॥ १०७ ॥

तथा च ।

एकमश्वानृते हन्ति दश हन्ति गवानृते ।
शतं कन्यानृते हन्ति सहस्रं पुरुषानृते ॥ १०८ ॥
उपविष्टः सभामध्ये यो न वक्ति स्फुटं वचः ।
तस्मादूरेण स त्याज्यो न्यायो वा कीर्तयेदृतम् ॥ १०९ ॥

तस्मादिश्रब्धौ भूत्वा कर्णोपान्ते निवेद्यताम् । किं बहुना । तेन क्षुद्रेण तूर्णं विश्वासितावुभौ यथा बुद्धिविहीनौ तौ संजातावङ्गवर्तिनौ । ततश्च तेनापि समकालमेकः पादान्तेनाक्रान्तोन्यो दंष्ट्राक्रकचेन । ततो गतप्राणौ तौ भक्षितावितरेति । अतोहं ब्रवीमि ।

क्षुद्रमर्थपतिं प्राप्य न्यायान्वेषणतत्परौ ।

Digitized by Google

उभावपि क्षयं प्राप्तौ पुरा शशकपिञ्जलौ ॥ ११० ॥

तद्भवन्तोऽप्येवं दिवान्धमर्थपतिमासाद्य राज्यन्धाः शशकपिञ्जलमार्गेण यास्यन्ति । एवं ज्ञात्वा यदुचितं तद्विधेयम् । अथ तस्य तद्वचनं श्रुत्वा साध्वनेनाभिहितमित्युक्त्वा भूयोपि पार्थिवार्थं समेत्य मन्तयिष्याम इति ब्रुवाणाः सर्वे यथाभिमतं जग्मुः । केवलमवशिष्टो भद्रासनोपविष्टोभिषेकार्थं दिवान्धः कृकालिकया सहास्ते । अथ तेनाभिहितम् । कः कोत्र । भोः किमद्यापि न क्रियते मेभिषेकः । अथ कृकालिकयाभिहितम् । भद्र कृतोयं विघ्नस्ते काकेन । गतास्ते विहगा यथेप्सितासु दिक्षु । केवलमेक एवायं वायसः केनापि हेतुना तिष्ठति । तदुत्तिष्ठ येन त्वां स्वाश्रयं प्रापयिष्यामि । तच्छ्रुत्वा स सविषादं वायसमाह । भो दुष्टात्मन् किं मया तेपकृतं यद्राज्याभिषेको मे विघ्नितः । तदद्यप्रभृति सान्वयमावयोर्वैरम् । उक्तं च ।

रोहते सायकैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥ १११ ॥

इत्येवमभिधाय कृकालिकया सह स्वाश्रयं गतः । अथ भयव्याकुलो वायसो व्यचिन्तयत् । अहो अकारणवैरमासादयता मया किं व्यात्कृतम् । उक्तं च ।

अदेशकालज्ञमनायतिक्षमं
यदप्रियं लाघवकारि चात्मनः ।
योब्रूयवीत्कारणवर्जितं वचो
न तद्वचः स्यादृषमेव तद्भवेत् ॥ ११२ ॥
बलोपपन्नोपि हि बुद्धिमान्नरः
परं नयेन्न स्वयमेव वैरिताम् ।

Digitized by Google

भिषङ्ममास्तीति विचिन्त्य भक्षयेत्
अकारणात्को हि विचक्षणो विषम् ॥ ११३ ॥

एवमुक्त्वा काकोपि स्वभवनं प्रति प्रायात् । तदुत्स एवमस्माभिः सह वैरं कौशिकानामन्वयागतम् । मेघवर्ण आह । तात तदेवं गतेस्माभिः किं क्रियते । स आह । वत्स एवं गतेपि षाड्गुण्यादपरः स्थूलोभिप्रायोस्ति । तमङ्गीकृत्य स्वयमेवाहं तद्विजयाय यास्यामि रिपून्वञ्चयित्वा वधिष्यामि । उक्तं च ।

बहुबुद्धिसमुपेताः सुविज्ञाना बलोत्कटान् ।
शक्ता वञ्चयितुं धूर्ता ब्राह्मणं छागलादिव ॥ ११४ ॥

मेघवर्ण आह । कथमेतत् । सोब्रवीत् ।

कथा ३.

अस्ति कस्मिंश्चिदधिष्ठाने मित्रशर्मा नाम ब्राह्मणः कृताग्निहोत्रपरिग्रहः प्रतिवसति स्म । स कदाचिन्माघमासे सौम्यानिले प्रवाति मेघाच्छादिते गगणे मन्दंमन्दं वर्षति पर्जन्ये पशुप्रार्थनार्थं कांचिद्ग्रामान्तरं गतः । कश्चिद्यजमानो याचितः । भो यजमान आगाम्यमावास्यायां यक्ष्यामि यज्ञम् । तद्यजनार्थे पशुमेकं समर्पय । अथ तेनातीव पीवरतनुः पशुः प्रदत्तः । सोपि समर्थस्तं पशुमितश्चेतश्च गच्छन्तं विज्ञाय स्कन्धे कृत्वा सत्वरं पुराभिमुखं प्रतस्थे । अथ तस्य गच्छतो मार्गे त्रयो धूर्ताः क्षुत्क्षामकण्ठाः संमुखा बभूवुः । तैस्तादृशं पीवरतनुं पशुं स्कन्धे कृतमालोक्य मिथोभिहितम् । भो अस्य पशोर्भक्षणादद्यतनीयो हिमपातो व्यर्थतां नीयते । तदेनं वञ्चयित्वास्य सकाशाद्गृह्यते । अथ तेषामेकतमो वेषपरिवर्तनं विधाय संमु-

Digitized by Google

खो भूत्वापरमार्गेण तमाहिताग्निमूचे । भो भो बालाग्निहोत्रिन् किमेवं जनविरुद्धं हास्यकार्यमनुष्ठीयते यदेष सारमेयोपवित्रः स्कन्धाधिरूढो नीयते । उक्तं च ।

श्वानकुक्कुटचाण्डालाः समस्पर्शाः प्रकीर्तिताः ।
रासभोष्ट्रौ विशेषेण तस्मात्तान्नैव संस्पृशेत् ॥ ११६ ॥

ततश्च तेन कोपाविष्टेनाभिहितम् । अहो किमन्धो भवान्यत्पशुं सारमेयत्वे न प्रतिपादयसि । स आह । ब्रह्मन् न कोपः कार्यः । यथेच्छं गम्यताम् । अथ यावत्किंचिद्दूनान्तरं गच्छति तावद्वितीयो धूर्तः संमुखमभ्युपेत्य तमुवाच । भो ब्रह्मन् कष्टं कष्टम् । यद्यपि वल्लभोयं मृतवत्सस्तथापि स्कन्ध आरोपयितुमशक्यः ।

उक्तं च ।

तिर्यञ्चं मानुषं वापि यो मृतं संस्पृशेत्कुधीः ।
पञ्चगव्येन शुद्धिः स्यात्तस्य चान्द्रायणेन वा ॥ ११६ ॥

अथासौ सकोपमाह । भोः किमन्धो भवान्यत्पशुं मृतवत्सं वदसि । सोब्रवीत् । भगवन् मा कोपं कुरु । अज्ञानान्मयाभिहितम् । तत्त्वमात्मन उचितेन समाचरेति । अथ यावत्स्तोकं वनान्तरं गच्छति तावत्तृतीयो धूर्तः संमुखमुपेत्य तमुवाच । भो अयुक्तमेतद्यद्रासभं स्कन्धारूढं नयसि । तत्त्यज्यतामेषः । उक्तं च ।

यः स्पृशेद्रासभं मर्त्यो ज्ञानादज्ञानतोथवा ।
सचैलं स्नानमुद्दिष्टं तस्य पापप्रशान्तये ॥ ११७ ॥

तत्त्यजैनं यावत्कोपि न पश्यति । अथासौ तं पशुं राक्षसं मन्यमानो भयाद्भूमौ प्रक्षिप्य स्वगृहमुद्दिश्य पलायितुं प्रारब्धः । ततस्तेपि त्रयो मिलित्वा पशुमादाय यथेच्छं भक्षितुमारब्धाः । अतोहं ब्रवीमि ।

Digitized by Google

बहुबुद्धिसमुपेताः सुविज्ञाना बलोत्कटान् ।
शक्ता वञ्चयितुं धूर्ता ब्राह्मणं छागलदिव ॥ ११८ ॥

अथवा साध्विदमुच्यते ।

अभिनवसेवकविनयैः प्राघूर्णोक्तैर्विलासिनीरुदितैः ।
धूर्तजनवचननिकरैरिह कश्चिदवञ्चितो नास्ति ॥ ११९ ॥

तदत्रास्ति किंचिदुक्तव्यमेव । तदवधार्यं यथोक्तमनुष्ठीयताम् । स आह । तर्हि समादिश । तवादेशो नान्यथा कार्यः । स्थिरजीव्याह । वत्स आकर्णय तर्हि सामादीनतिक्रम्य यो मया पञ्चम उपायो निरूपितः । तन्मां विपक्षभूतं कृत्वातिनिष्ठुरवचनैर्भर्त्सय । यथाविपक्षप्रणिधीनां प्रत्ययो भवति तथा समाकृतरुधिरैरालिप्य मां न्यग्रोधस्याधः प्रक्षिप्य गम्यतां पर्वतमृष्यमूकं प्रति । तत्र सपरिवारस्तिष्ठ यावदहं सपत्नान्सुप्रणीतेन विधिना विश्वास्याभिमुखान्कृत्वा कृतार्थो ज्ञातदुर्गमध्यो दिवसे तानन्धतां प्राप्तांस्त्वां नीत्वा व्यापादयिष्यामि ज्ञातं मया सम्यक् । नान्यथा सिद्धिरस्ति । मत्वेक्षस्व । यतो दुर्गमेतदपसाररहितं केवलं वधाय भवति । उक्तं च ।

अपसारसमायुक्तं नयज्ञैर्दुर्गमुच्यते ।
अपसारपरित्यक्तं दुर्गव्याजेन बन्धनम् ॥ १२० ॥

न च त्वयास्मदर्थं कृपा कार्या । उक्तं च ।

अपि प्राणसमानिष्टान्पालितांश्छालितानपि ।
भृत्यान्युद्धसमुत्पन्नान्पश्येन्म्लानामिव स्रजम् ॥ १२१ ॥

तथा च ।

प्राणवद्रक्षयेद्भृत्यान्स्वकायमिव पोषयेत् ।
सदैकदिवसस्यार्थे यत्र स्याच्छत्रुसंगमः ॥ १२२ ॥

Digitized by Google

तत्त्वया नात्र विषये निषेधनीयोहम्। इत्युक्त्वा तेन सह शुष्ककलहं कर्तुमारब्धः। अथान्ये ते तस्य भृत्याः स्थिरजीविनमुच्छृङ्खलवाचा जल्पन्तमवलोक्य तस्य वधायोद्यता मेघवर्णेनाभिहिताः। अहो निवर्तध्वं यूयम्। अहमेवास्य शत्रुपक्षपातिनो दुरात्मनः स्वयं निग्रहं करिष्यामि। इत्यभिधाय तस्योपरि समारुह्य लघुचञ्चुप्रहारैस्तं निहत्य रुधिरेण प्लावयित्वा यथाभिप्रेतं सपरिजनो गतः। अत्रान्तरे कृकालिकया द्विषत्प्रणिधिभूतया सर्वं तदमात्यव्यसनं मेघवर्णस्य गमनं घोलूकराजाय निवेदितम्। यत्तवारिः संप्रति क्वापि भीतो भीतपरिवारश्च प्रचलितः। उलूकोपि तदाकर्ण्यास्तमनवेलायां सामात्यपरिजनो वायसवधार्थं प्रचलितः। प्राह च। यदहो त्वर्यतां त्वर्यताम्। भीतः शत्रुः पलायनपरः पुण्यैर्लभ्यते। उक्तं च।

शत्रोः प्रचलने छिद्रमेकमन्यत्र संश्रयम्।
कुर्वाणो जायते वश्यो व्यग्रत्वे राजसेविनाम् ॥ १२३ ॥
न च च्छिद्रं विना शत्रुर्देवानामपि सिध्यति।
छिद्रं शक्रेण संप्राप्य दितेर्गर्भो विदारितः ॥ १२४ ॥

एवं ब्रुवाणाः समन्तात्तं न्यग्रोधपादपमधः परिवेष्ट्यावस्थिताः। यावन्न कश्चिद्वायसो दृश्यते तावच्छाखाग्रसमारूढो दृष्टमनाः स्तूयमानो वन्दिभिरुलूकराज एतदुवाच। अहो ज्ञायतां तेषां मार्गः। यत्कृतमेन मार्गेण ते प्रनष्टाः काकाः। तत्र यावद्दुर्गं समाश्रयन्ति तावदेव पृष्ठतो गत्वा व्यापाद्या भवन्ति। उक्तं च।

वृतिमप्याश्रितः शत्रुरवध्यः स्याज्जिगीषुणा।
किं पुनः संश्रितो दुर्गं सामग्र्या परया युतम् ॥ १२५ ॥

अथास्मिन्प्रस्तावे स्थिरजीवी मन्दंमन्दं शब्दमकरोत्। तच्छ्रुत्वा

Digitized by Google

ते सर्वेप्युलूकास्तस्य वधार्थं प्रजग्मुः । अथ तेनोक्तम् । अहो अहं स्थिरजीविनामा मेघवर्णस्य मन्त्री मेघवर्णेनेदृशीमवस्थां नीतः । तन्निवेदयध्वमात्मनः स्वामिने । तेन सह बहु वक्तव्यमस्ति । अथ तैर्निवेदिते स उलूकराजो विस्मयमाविष्टस्तत्सकाशं गत्वा प्रोवाच । भोः किमेतां दशां गतस्त्वम् । तत्कथ्यताम् । स्थिरजीव्याह । देव श्रूयताम् । अतीतदिने स दुरात्मा मेघवर्णो युष्मद्यापादितप्रभूतवायसान्दृष्ट्वा युष्माकमुपरि कोपशोकग्रस्तो युद्धार्थं प्रचलित आसीत् । ततो मयाभिहितम् । स्वामिन् न युक्तं भवतस्तदुपरि गन्तुम् । उक्तं च ।

बलीयसा हीनबलो विरोधं
न भूतिकामो मनसापि वाञ्छेत् ।
न वध्यते वेतसवृत्तिरत्र
व्यक्तं प्रणाशो हि पतंगवृत्तेः ॥ १२६ ॥

तत्तस्योपप्रदानेन संधिर्विधातुं युक्तः । उक्तं च ।

बलवन्तं रिपुं दृष्ट्वा सर्वस्वमपि बुद्धिमान् ।
दत्त्वा प्ररक्षयेत्प्राणान्रक्षितैस्तैर्धनं पुनः ॥ १२७ ॥

तच्छ्रुत्वा तेन दुर्जनप्रकोपितेन त्वत्पक्षपातिनं मामशङ्कमनिनाहमीदृशीमवस्थां नीतः । तत्तव पादाः सांप्रतं मे शरणम् । किं बहुना विज्ञप्तेन । यावदहं प्रचलितुं शक्नोमि तावत्त्वां तस्याश्रये नीत्वा सर्ववायसक्षयं विधास्यामि । अथारिमर्दनं एतदाकर्ण्य पितृपैतामहान्सचिवानेकत्र स्थान आकार्य तैः सह मन्त्रितवान् । रक्ताक्षः क्रूराक्षो दीप्ताक्षो वक्रनास एते तस्य चत्वारः सचिवाः । तत आदौ रक्ताक्षं पृष्टवान् । भद्र तावदेष तस्य रिपोर्मन्त्री मम हस्तगतः । तत्किं क्रियताम् । स आह । देव एष तस्याद्यो मन्त्री यद्यपि वेलामुहूर्तगुणेन

Digitized by Google

दुर्जनोक्तेन वाक्येन वियोजितस्तदप्यस्य वाक्यं श्रोतव्यं यतो न सदैव विग्रहासक्तेन भूभुजा भाव्यम् । उक्तं च ।

कोशक्षयो न निद्रा च न विलासेषु च स्पृहा ।
विग्रहासक्तचित्तानां न रतिः क्वापि जायते ॥ १२८ ॥

तस्मादस्य दूरेण तेन सह साम्ना वर्तितव्यम् । उक्तं च ।

सामादिदण्डपर्यन्तो नयः प्रोक्तः स्वयंभुवा ।
तेषां दण्डस्तु पापीयांस्तं पश्चादेव नियोजयेत् ॥ १२९ ॥

तथा च ।

सामसिद्धानि कार्याणि विकृतिं यान्ति न क्वचित् ।
सज्जनानां मनांसीव भवन्ति प्रमुदे सदा ॥ १३० ॥
सामसाध्येषु कार्येषु यो दण्डं योजयेद्बुधः ।
स पित्ते शर्कराशाम्ये पटोलं कटुकं पिबेत् ॥ १३१ ॥

यत्केचिच्चैवं वदन्ति । यच्छत्रवो दण्डसाध्याः स्युर्न सामसाध्यास्तदप्ययुक्तम् । उक्तं च ।

पर्णशब्दमपि श्रुत्वा त्रस्यन्ति हरिणाश्च ये ।
तेपि साम्नात्र बध्यन्ते लुब्धकैः पश्य सर्वदा ॥ १३२ ॥

अन्यच्च ।

शत्रोरुच्छेदनार्थाय न साम्नोस्त्यन्यदौषधम् ॥
हेमन्ते हिमपातेन पद्मिनी किं न दह्यते ॥ १३३ ॥

तदादि महद्भिः प्रमाणं तत्संधानाय वधाय वा रिपोः साम प्रयोक्तव्यं यतो नीतावप्युक्तम् ।

शनैःशनैर्ददात्येष पादौ भूतानुकम्पया ।
अहो जलचरः प्राणी बकः परमधार्मिकः ॥ १३४ ॥

Digitized by Google

एवं तस्याभिप्रायं बुद्धा क्रूराक्षमाह । भद्र तवाभिप्रायमपि श्रोतुमिच्छामि । एवंविधे कृत्ये समुपस्थिते किं मम कृत्यं भवति । स आह । देव तेन निसर्गवैरिणा यत्सामप्रयोजनं तन्मम न भाति । उक्तं च ।

चतुर्थोपायसाध्ये तु शत्रौ शान्त्वमपक्रिया ।
स्वेद्यमानज्वरं प्राज्ञः कोम्भसा परिषिञ्चति ॥ १३५ ॥

तद्भेदसाध्यो दुष्टोपि रिपुर्भवति । उक्तं च ।

अपि वीर्योत्कटः शत्रुर्यतो भेदेन सिध्यति ।
तस्माद्भेदः प्रयोक्तव्यः शत्रूणां विजिगीषुणा ॥ १३६ ॥
असाध्यं शत्रुमालोक्य दायादं तस्य भेदयेत् ।
राज्यकामं समर्थं च यथा रामो विभीषणम् ॥ १३७ ॥
कूटलेख्यैर्धनोत्सर्गैर्दूषयेच्छत्रुपक्षजम् ।
प्रधानपुरुषं यद्वद्विष्णुगुप्तेन राक्षसः ॥ १३८ ॥
भेदयेच्च बलं राजा दुर्भेद्यमपि चित्ततः ।
यतः सुखेन भज्येत घुणोत्कीर्णसुदारुवत् ॥ १३९ ॥

एवं ज्ञात्वा विवेकिना शत्रुसाधनाय भेदः प्रयोक्तव्यः । सर्वो विजिगीषुर्गुणयुक्तोपि शत्रुभेदात्तव वश्यो भवति । उक्तं च ।

अत्यच्छेनाविरुद्धेन सुवृत्तेनातिचारुणा ।
अन्तर्भिन्नेन संग्राह्यं मौक्तिकेनापि बन्धनम् ॥ १४० ॥

तद्यदि मम मतमनुष्ठीयते तदा स्वपक्षे भेदो रक्ष्यः परपक्षे प्रयोक्तव्यः । एवं तस्याभिप्रायं विदित्वा दीप्ताक्षमाह । भद्र अत्र विषये तव कोभिप्रायः । स आह । देव मम सामभेदौ द्वावपि न प्रतिभासेते यतो न साम्ना न च भेदेन तथा शत्रुः सिध्यति यथोपप्रदानलुब्ध

Digitized by Google

उपप्रदानेन विश्वास्य वध्यः स्यात्। उक्तं च।

लोभाविष्टो नरो वित्तं वीक्षते न स चापदम्।
दुग्धं पश्यति मार्जारो यतो न लकुटाहतिम्॥ १४१॥
शत्रुं वाञ्छाविघाताय बुद्धियुक्तो महीपतिः।
साम्यं नयति सौम्येन यथैवाग्निं महोदधिः॥ १४२॥
अपि स्यात्पितृहा वैरी सोपि दानविलोभितः।
गत्वा विश्वासभावं स शत्रोरात्मानमर्पयेत्॥ १४३॥
दुर्गस्था अपि वध्यन्ते शत्रवो दानसंश्रयात्।
स्वल्पमांसप्रदानेन कैवर्तैस्तिमयो यथा॥ १४४॥

अपरं यच्छत्रोरुपप्रदानं वर्जयन्ति तदप्ययुक्तं यत उपप्रदानव्याजाच्छत्रुर्निर्मूलतां याति। उक्तं च।

उच्छेद्यमपि विद्वांसो वर्धयन्त्यरिमेकदा।
गुडेन वर्धितः श्लेष्मा यतो निःशेषतां व्रजेत्॥ १४५॥

एवं तद्वचनमाकर्ण्य बकनासमूचे। भो निवेद्यतामात्मनोभिप्रायः। स आह। देव किं वदामि यत्तयाणामप्येषां मध्यान्नैकेनापि नीतिशास्त्राश्रयमभिहितं यतोशक्तानामेते सामभेदोपप्रदानोपायाः शक्तानां पुनः शत्रुविषये दण्ड एव। उक्तं च।

दण्डं मुक्त्वा नृपो योन्यानुपायान्योजयेद्रिपोः।
स तं भीतमिव ज्ञात्वा स्वैरं तं प्रति धावति॥ १४६॥

अपरं सामादिभिर्या लक्ष्मीर्भूभुजां दण्डं विना सा लक्ष्मीश्चिरं न प्रभवति। उक्तं च।

अकृत्वा पौरुषं या श्रीर्विक्रासिन्यापि किं तया।
जरद्गवोपि चाश्नाति देवादुपगतं तृणम्॥ १४७॥

Digitized by Google

मनसा सर्वलोकानां लक्ष्मीर्हस्तगतैव हि ।
कर्मणोद्दामदण्डानामेव स्याद्वशवर्तिनी ॥ १४८ ॥
दुर्लभा स्त्रीव चित्तेन लक्ष्मीः संसेव्यतेलसैः ।
पण्यस्त्रीवोद्यतैश्चैव युद्धे वीर्यधनप्रदैः ॥ १४९ ॥
किरीटमणिचित्रेषु मूर्धसूत्तानरश्मिषु ।
नादत्त्वा द्विषतां पादं पुरुषः श्रियमश्नुते ॥ १५० ॥
हेलाकृष्टस्फुरत्खड्गदीप्तांशुपरिपिञ्जरैः ।
श्रीमत्करिकराकारैराहार्यन्ते भुजैः श्रियः ॥ १५१ ॥
पराक्रमपरामर्षवशीकृतरिपोस्त्वसौ ।
लक्ष्मीरन्याङ्कसुप्तैव स्वयं गृहकुटुम्बिनी ॥ १५२ ॥
शत्रोः श्रियं सदोत्थायी सैंहीं वृत्तिं समाश्रितः ।
कचग्रहेण भुञ्जीत दुर्विनीतामिव स्त्रियम् ॥ १५३

एवं चतुर्थो वक्रनासमन्त्रो दण्डसाध्यः । ततस्तस्यापि वचः समाकर्ण्य प्राकारकर्णमुदासीनं वृद्धसचिवमाह । भो अभिधीयतामात्मनोभिप्रायः । स आह । देव अवध्योयं विशेषात्तव पक्षाश्रयः शरणागतश्च । तदेनं स्वदुर्गे नीत्वा संमानय । ततोनेनाग्रसरेण शत्रवो व्यापादनीयाः स्युः । उक्तं च ।

मत्स्यो मत्स्यमुपादत्ते ज्ञातिर्ज्ञातिमसंशयम् ।
रावणोच्छित्तये रामो विभीषणमपूजयत् ॥ १५४ ॥

अपरमस्य वधान्महापातकमस्ति । उक्तं च ।

वदन्तु दैन्यं शरणागतेषु
बहुप्रहारेषु भयेन युक्ताः ।
दयाविहीनाः प्रहरन्ति येत्र

ते रौरवादीनि निषेवयन्ति ॥ १५५ ॥

अपरं च ।

दक्षिणादिसमृद्धस्य वाजिमेधस्य यत्फलम् ।
तत्फलं लभते सम्यग्यो रक्षेच्छरणागतम् ॥ १५६ ॥

एवं पञ्चमः प्राकारकर्णस्य मन्तः । अथ तस्य तदाकर्ण्य स्वयमरिमर्दनोभिहितवान् । भो ममाप्ययमभिप्रायः । एष तावत्कपटी न भवति । मदर्थे स्वामिना तिरस्कृतः । तद्युज्यते स्वे दुर्गे नेतुम् । युक्तमुक्तं प्राकारकर्णेन । यदि पुनरेष त्यज्यते हन्यते वा ततः कृतघ्नतादोषो भवति । तथा च ।

ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ १५७ ॥

तथा च ।

सत्कृताश्च कृतार्थाश्च कृतज्ञा न भवन्ति ये ।
मृतानामपि नो काकास्तेषां मांसानि भुञ्जते ॥ १५८ ॥

तस्मादस्याहं संमानं करिष्यामि । तच्छ्रुत्वा वक्रनास आह । देव न युक्तमेतच्छत्रुपक्षपातिनां दुर्गदर्शनम् । उक्तं च ।

अज्ञाताः पुरुषा यस्य प्रविशन्ति महीपतेः ।
दुर्गं तस्य न संदेहः प्रविशन्ति द्रुतं द्विषः ॥ १५९ ॥

तच्छ्रुत्वारिमर्दन आह । भो न युक्तमुक्तं भवता । दुर्गं दुर्गमिति कातरप्रवादोयम् । शूराणां तु स्वभुजवीर्यपञ्जरं दुर्गम् । उक्तं च ।

यस्य स्यात्सहजं वीर्यं हन्यते स तु नारिभिः ।
मणिदीपस्य नोग्रोपि वायुर्बाधयते शिखाम् ॥ १६० ॥

दुर्गाश्रयोपि कालेन नाशं यास्यति । उक्तं च ।

Digitized by Google

स्थानं त्रिकूटं परिखा समुद्रो
रक्षांसि योधा धनदश्च वित्तम् ।
शास्त्रं च यस्योशनसा प्रणीतं
स रावणः कालवशादिपन्नः ॥ १६१ ॥

इत्युक्त्वा तमुवाच । भोः स्थिरजीविन् मया त्वं तावत्परिग्रहासंमतेनापि रक्षितो गृहीतश्च । तदागम्यतां मे दुर्गम् । तत्र च यत्तव कुलोचितं तत्कुरुष्व । सोप्यन्तर्विहस्य तमुवाच । भोः स्थिरजीविनः किमतिबहुना व्यर्थप्रलपनेन । मदीयकुलीनतां फलेन ज्ञास्यति भवान् । तच्छ्रुत्वा वक्रनासः प्रोवाच । भो विनष्टं कुलमस्माकम् ।

सासा संपद्यते बुद्धिः सा मतिः सा च भावना ।
सहायास्तादृशा ज्ञेया यादृशी भवितव्यता ॥ १६२ ॥

कौशिकानां राजदोषेण विनाशः समागतः । तत्कस्य कथ्यते । उक्तं च ।

दोषमार्त्तो जनः कृत्स्नं पार्थिवाय निवेदयेत् ।
यदा स्याद्दोषवान्भूपस्तदा कस्तं निषेधयेत् ॥ १६३ ॥

एवं तमनादृत्य स्थिरजीविनमादाय स्वदुर्गमाससादोलूकपतिः । स्थिरजीव्यपि तद्दुर्गविषमतामालोक्य स्वचित्तेचिन्तयत् । एतद्दुर्गं तावद्यथोक्तं दुर्गविषमं परमसारं नास्ति । तदन्तर्मृत्युपाशबद्धा मम वशे संजाताः । येन मन्त्रिणा वक्रनासेन स्वस्वामी मां प्रति स्थिरजीवी वध्यतामित्युक्तस्तत एषामुलूकानां मध्ये नीतिज्ञोयं हितश्च । अन्ये तु मूढतमाः स्वामिना सह । अथ त उलूकास्तेनोलूकपतिनोक्ताः । यदहो स्थिरजीविनो भद्रतर आश्रयः समर्पणीय इति । स्थिरजीवी तच्छ्रुत्वा व्यचिन्तयत् । मया तावदेषां वधोपायश्चिन्तितव्यः । ततः

Digitized by Google

स मया मध्यस्थितेन न भविष्यत्येतेपि यतः सावधाना भविष्यन्ति । तदेतद्दुर्गद्वारमाश्रयामि येनात्र स्थितोभिप्रेतं करोमि । ततश्चोलूकभूपमाह । देव तत्रैतदुक्तम् । परमहमपि नीतिज्ञो हितश्च । यद्यपि तत्वानुरक्तः शुचिस्तथापि स्वदुर्गमध्ये न वासो ममार्हः । तदहमत्रैव दुर्गद्वारे स्थितः सदा भक्तिसेवां करिष्यामि । तथानुष्ठिते वक्रनासः स्ववर्गीयानाहूय प्रोवाच । भो एतावत्कालं यावदेतद्दुर्गं कुशलं चास्माकं भूपतेरभूत् । परं संप्रत्यन्यं पर्वतमाश्रित्य वयं सर्वेन्यद्दुर्गं संश्रयामः । उक्तं च ।

अनागतं यः कुरुते स शोभते
स शोचते यो न करोत्यनागतम् ।
वनेत्र संस्थस्य समागता जरा
बिलस्य वाणी न कदापि नः श्रुता ॥ १६४ ॥

ते प्रोचुः । कथमेतत् । सोब्रवीत् ।

कथा ४.

कस्मिंश्चिद्वनप्रदेशे खरनखरो नाम सिंहः प्रतिवसति स्म । स कदाचिदितश्चेतश्च परिभ्रमन्क्षुत्क्षामो न किंचित्सत्त्वमाससाद । ततश्चास्तमनसमये महतीं गुहामासाद्य प्रविश्य चिन्तितवान् । नूनमेतस्यां गुहायां रात्रौ केनचित्सत्त्वेनागन्तव्यम् । तन्निभृतो भूत्वा तिष्ठामि । एवं तस्य तत्र स्थितस्याधिपुच्छो नाम तत्स्वामी लोपाशकः समायातः । स यावत्पश्यति तावत्सिंहपदपद्धतिर्गुहायां प्रविष्टा भवति न च निष्क्रान्ता । ततश्चाचिन्तयत् । अहो विनष्टोस्मि । नूनमस्यामन्तर्गतेन सिंहेन भाव्यम् । तत्किं करोमि । कथं यास्यामि । एवं विचिन्त्य

Digitized by Google

द्वारस्थः फूत्कर्तुमारब्धः । अहो बिल रे । इति प्रोच्य भूयोप्यभाषत । भोः किं न वेत्सि यत्त्वया सहैकः समयधर्मोस्ति । मया त्वं वक्तव्यो बाह्यात्समायातेन त्वयाप्यहमाकारणीयः । तद्यदि मां नाह्वयसि ततोहं द्वितीयां गुहां यास्यामि । सिंहोपि तच्छ्रुत्वा चिन्तितवान् ।

नूनमेषा गुहा समायातस्याह्वानं सदा करोति । सात्र मद्भायाञ्च किंचिदूचे । अथवा साध्विदमुच्यते ।

भयसंत्रस्तमनसां हस्तपादादिकाः क्रियाः ।
प्रवर्तन्ते न वाणी च वेपथुश्चाधिको भवेत् ॥ १६५ ॥

तदहमप्याह्वानं करोमि येन प्रविश्य मम भोज्यतां यास्यतीति एवं संप्रधार्य तस्याह्वानमकरोत् । अथ सिंहशब्देन सा गुहा प्रतिरवशतसंपूर्णान्यानपि दूरस्थान्सत्त्वांस्त्रासयामास । लोपाशकोपि पलायनपर इमं श्लोकमपठत् ।

अनागतं यः कुरुते स शोभते
स शोचते यो न करोत्यनागतम् ।
वनेत्र संस्थस्य समागता जरा
बिलस्य वाणी न कदापि नः श्रुता ॥ १६६ ॥

एवं मत्वा मया सह गम्यताम् । एवमभिधाय सपरिजनो वक्रनासोन्यं देशं गतः ।

अथ वक्रनासे गते स्थिरजीव्यपि प्रतृप्तमना व्यचिन्तयत् । अहो कल्याणमस्माकमुपस्थितम् । तदेते मूढतमाः सुवध्या मे संजाताः । उक्तं च ।

न दीर्घदर्शिनो यस्य मन्त्रिणः स्युर्महीपतेः ।
क्रमायाता ध्रुवं तस्य नचिरात्स्यात्परिक्षयः ॥ १६७ ॥

Digitized by Google

अहो साध्विदमुच्यते।

मन्त्रिरूपा हि रिपवः संभाव्यास्ते विचक्षणैः।
ये सम्यं नयमुत्सृज्य सेवन्ते प्रतिलोमतः॥ २६८॥

एवं विचिन्त्य स्वकुलाये वनकाष्ठिकामेकैकां दिनं प्रति प्रक्षिपति गुहाप्रदीपनार्थम्। न च ते मूर्खा उलूका जानन्ति यदेष कुलायमस्मदुद्योतनाय वृद्धिं नयति। अथवा साध्विदमुच्यते।

कृतान्तपाशबद्धानां दैवोपहतचेतसाम्।
बुद्धयः कुत्सनगामिन्यो भवन्ति महतामपि॥ २६९॥

अथ प्रभूतकाष्ठसंभारे कुलायव्याजेन रचिते दुर्गद्वारे सूर्योदये संजातेन्धतां प्राप्तेषूलूकेषु स्थिरजीव्यृष्यमूकं गत्वा मेघवर्णमाह। स्वामिन् दाहसाध्या कृता सा मे रिपुगुहा। तत्सर्वपरिवारः समेत्यैकैकां वनकाष्ठिकां ज्वलन्तीं प्रान्ते गृहीत्वा तत्र गुहाद्वारेस्मत्कुलाये प्रक्षिपतु येन सर्वशत्रूणां कुम्भीपाकनरकन्यायो भवति। तच्छ्रुत्वा प्रहृष्टो मेघवर्ण आह। तात तत्कथयात्मवृत्तान्तम्। चिरादृष्टोसि। स आह। वत्स नायं कालो वक्तव्यस्य यतः कदाचित्तस्य रिपोः कश्चित्प्रणिधिः समागमनं निवेदयिष्यति। ततो ज्ञानादतोप्यपसरणमन्यत्र कुर्वन्ति। तत्त्वर्यतां त्वर्यताम्। उक्तं च।

शीघ्रकृत्ये समुत्पन्ने विलम्बयति यो नरः।
तत्कृत्ये देवता तस्य कोपाद्विघ्नं प्रयच्छति॥ २७०॥

तथा च।

यस्यस्य हि कार्यस्य सफलस्य विशेषतः।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्॥ २७१॥

तद्गृहायातस्ते हतशत्रोः सर्वं सविस्तरं निर्व्याकुलतया कथयि-

Digitized by Google

ष्यामि । अथासौ तदाकर्ण्य सपरिजन एकैकां शुष्कवनकाष्ठिकां चञ्चुपुटेन गृहीत्वा तद्गृहद्वारं प्राप्य स्थिरजीविबिलाये प्रक्षिप्तवान् । ततस्ते सर्वे दिवान्धा वक्रनासमन्त्रिवाक्यं स्मरन्तो द्वारस्थावृतत्वादनिःसरन्तो गुहामध्ये कुम्भीपाकस्थायमापन्ना मृताश्च । एवं शत्रून्निःशेषतां नीत्वा भूयोपि मेघवर्णस्तमेव न्यग्रोधवादपुर्गं गतः प्रमुदितमनाः सुखोपविष्टः सभामध्ये स्थिरजीविनमपृच्छत् । यस्तात त्वया कथं शत्रुगतेनैतावत्कालो नीतः । तदत्र कौतुकमस्माकं वर्तते । तत्कथ्यताम् । स आह । आगामिफलवाञ्छयैव कष्टमपि सेवद्भिर्न ज्ञायते । उक्तं च ।

शक्तेनापि सता जनेन विदुषा कालान्तरापेक्षिणा
वस्तव्यं खलु वज्रपातविषमे क्षुद्रेपि पापे जने ।
दर्वीव्यग्रकरेण धूममलिनेनायासयुक्तेन किं
भीमेनातिबलेन मत्स्यभवनेपूपा न संवर्द्धिताः ॥ १७२ ॥

तथा च ।

कार्यस्यापेक्षया भुक्तं विषमप्यमृतायते ।
सर्वेषां प्राणिनां यत्र नात्र कार्या विचारणा ॥ १७३ ॥

अन्यच्च ।

सिद्धिं वाञ्छयता जनेन विदुषा तेजो निगृह्य स्वकं
सत्त्वोत्साहवतापि दैवगतिषु स्थैर्यं प्रकार्यं क्रमात् ।
देवेन्द्रद्रविणोपमैर्बहुगुणैरभ्यर्चितो भ्रातृभिः
किं क्लिष्टः सुचिरं विराटभवने पूर्वं न धर्मात्मजः ॥ १७४ ॥

तथा च ।

रूपेणाप्रतिमेन यौवनगुणैः श्रेष्ठे कुले जन्मना

गन्तव्यानि दिनानि देववशतो भूयो धनं वाञ्छता ।
सैरन्ध्रीति विगर्हिता युवतिभिः साक्षेपमाज्ञाभया-
द्द्रौपद्या किल मत्स्यराजभवने घृष्टं न किं चन्दनम् ॥ १७५॥

तत्स एव नीतिज्ञो भवति योपमानमपि सहित्वा कार्यं साधयति । उक्तं च । 5

महत्त्वमेतन्महतां नयालंकारधारिणाम् ।
न मुञ्चन्ति यदारम्भं प्राप्तेपि व्यसनोदये ॥ १७६ ॥

तथा च ।

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः । 10
विघ्नैः सहस्रगुणितैरपि हन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥ १७७ ॥

मेघवर्णं आह । तत्कृतं निष्कण्टकं मे राज्यं शत्रून्निःशेषतां नयता त्वया । अथवा युक्तमेतन्नयवादिनाम् । उक्तं च ।

ऋणशेषं चाग्निशेषं शत्रुशेषं तथैव च । 15
पुनःपुनः प्रवर्धन्ते तस्माच्छेषं न धारयेत् ॥ १७८ ॥

तन्नास्ति त्वत्समोन्यो मन्त्री बुद्धिमान्येन शस्त्रमोक्षणं विनापि स्वबुद्ध्या शत्रवो हताः । अथवा साध्वेदमुच्यते ।

शस्त्रैर्हतास्तु रिपवो न हता भवन्ति
प्रज्ञाहताश्च नितरां सुहता भवन्ति । 20
शस्त्रं निहन्ति पुरुषस्य शरीरमेकं
प्रज्ञा कुलं च विभवं च यशश्च हन्ति ॥ १७९ ॥

स्थिरजीव्याह । स देवप्रतापभावोयं भविष्यद्वृद्धिसूचकः । वयं

Digitized by Google

पुनर्मूकाः कृत्यानुष्ठानमात्राः । उक्तं च ।

प्रसरति मनः कार्यारम्भे दृढीभवति स्पृहा
स्वयमुपनयन्नर्थान्मन्त्रो न गच्छति विप्लवम् ।
फलति सकलं कृत्यं चित्तं समुन्नतिमश्नुते
भवति च रतिः श्लाघ्ये कृत्ये नरस्य भविष्यतः ॥ १८० ॥

तत्तव भविष्यतो विपक्षस्य भवितव्यतेति बुद्धिविपर्यासेन ज्ञातं मया। ये विज्ञा भवन्ति पुरुषाणां भविष्यतामभविष्यतां च व्यवहारादेव जानन्ति। उक्तं च ।

वाञ्छैव सूचयति पूर्वतरं भविष्यं
पुंसोन्यजन्मसुकृतं यदिवेतरच्च ।
विज्ञायते शिशुरजातकलापचिन्हः
प्रत्यक्पदैरपसरन्सरसः कलापी ॥ १८१ ॥

तद्यस्य विधिः संमुखो भवति स त्वमिव बुद्धिसंपन्नो भवति । उक्तं च ।

न देवा यष्टिमादाय रक्षन्ति पशुपालवत् ।
यं तु वर्धितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम् ॥ १८२ ॥
न देवाः शस्त्रमादाय निघ्नन्ति रिपुवत्क्रुधा ।
यं तु हिंसितुमिच्छन्ति बुद्ध्या विश्लेषयन्ति तम् ॥ १८३ ॥
बुद्धौ कलुषभूतायां विनाशे पर्युपस्थिते ।
अनयो नयसंकाशो हृदयान्नापसर्पति ॥ १८४ ॥

तथा तव रिपोः संजातो बुद्धिविश्लेषः ॥

॥ समाप्तं चेदं काकोलूकीयं नाम तृतीयं तन्त्रम् ॥

Digitized by Google

NOTES TO PANCHATANTRA II. AND III.

P. 1. L. 6.—महिलारोप्य is, according to Benfey Panch. Vol. II. note 4, probably the town, called by Ptolemy, 'Maliarpha,' and in Tamil 'Mayilpur,' situated near Madras.

P. 1. L. 9.—Metre of s'loka 2: S'árdúlavikrídita.

P. 2. L. 9 & 10.—The first adjective belongs to the first noun, and the second adjective to the second noun.

P. 2. L. 12—Metre of s'loka 4: S'árdúlavikrídita.—पैलस्त्य-रावण.

P. 2. L. 20.—मत्वा-ज्ञात्वा see also Panch. IV., and V. note to p. 10. l. 7.

P. 2. L. 22.—बुद्धि 'presence of mind,' हीयते 'does (not) fail.'

P. 3. 2.—नो चेत् 'otherwise—(if you etc.') The two words denote only the alternative and must be taken by themselves. Another चेत् or यदि must be understood with the following न करिष्यथ.

P. 3. L. 5.—उपमा सताम् 'just so it is with etc.'

P. 3. L. 13.—Metre of s'loka 9: A'ryá.

P. 4. L. 20.—It is most likely better to alter the reading of the Mss. नित्यं नागच्छन्ति and to write नित्यमागच्छन्ति, though the former reading may be defended.

P. 5. L. 4.—Metre of s'loka 17: Vasantatilaká.

P. 5. L. 9.—माविलम्बम् 'without delay' avyayíbháva compound, compare माचिरम् [Benfey].

P. 5. L. 13.—Metre of s'loka 19: Drutavilambita.

Digitized by Google

P. 5. L. 18.—Metre of s'loka 20: S'árdúlavikrídita.

एकान्त 'solitude'.—दुर्नीतं—गुणः। Sense: 'It is impossible to perceive any effect of merit (सुकृतं) or demerit (दुर्नीतं); nor does an apparently safe place afford protection, since fate etc.'

P. 7. L. 7.—The latter half of s'loka 26 contains an allusion to the tides of the ocean.—उपेक्षते 'waits for, *i. e.*, avails himself of the assistance of.'

P. 8 L. 18.—ईश्वर 'rich.'

P. 9 L. 2.—नीतिसर्वस्वम् 'the quintessence of polity.'

P. 9. L. 3.—For s'loka 31, compare Tantra IV. and V., note to p. 5. l. 21.

P. 9. L. 5.—After करिष्यति, इति must be understood.

P. 9. L. 7.—Metre of s'loka 32: S'árdúlavikrídita.—कीर्यः "what do (brutes).....care for etc."

P. 9. L. 12.—निमित्तात् 'for some particular reason' *i. e.*, if the occasion requires their acting together, in order to avoid danger or to secure an advantage.

P. 9. L. 19.—The story of the destruction of Diti's fœtus by Indra is told Harivańs'a 239 ff.

P. 10. L. 7.—In this s'loka we have the titles of the three famous treatises on Níti, see also notes to Tantra IV. and V., p. 61. l. 1. and p. 65. l. 22.

P. 10. L. 10.—Construe: यो महतार्थसारेण सतापि; instrumental absolute.

P. 10. L. 13.—मैत्रीपक्षपातः ("I have) a great partiality for his friendship, *i. e.*, I needs must make him my friend."

P. 10. L. 15.—सापदीन=सापद see Tantra IV. and V., note to p. 41. l. 4.—बलात् 'against thy will.'

P. 11. L. 3.—Divide मांसशाकलानि मेध्यानि। बलिशेषाणि [च] अन्यानि [च] वत्सलाद्यानि पक्वान्नविशेषाणि ॥ वत्सल *n.* 'friendship.'—पक्वान्नविशेषाणि used as a neuter against the grammar.—शेष used as a neuter, rare but permissible.

Digitized by Google

P. 11. L. 15.—Metre of s'loka 48 : Vasantatilaká.

P. 11. L. 21.—कृत्रिममित्रतां गतौ "they concluded a friendship against nature" (as they were born enemies).

P. 12. L. 7.—उद्धरितः a Prakritic form, instead of उद्धृतः see also Benfey Panchatantra II., note 753.

P. 12. L. 20.—Construe [हे] तात [ते] धन्या [ये] न पश्यन्तीत्यादि ॥

P. 13. L. 5.—उड्डीनम्=उड्डयनम् ।

P. 13. L. 11.—संपातोड्डीनप्रोत्थतक्रमेण 'travelling by the flight called Sampáta.'

P. 13. L. 12.—देशकालज्ञवित् "knowing (what is proper for each) place and time, *i. e.*, clever."

P. 13. L. 18.—कलां नार्हन्ति षोडशीम् 'do not possess a sixteenth part [of the refreshing power] of a friend's embrace.'

P. 13. L. 19.—निपुणतरं ज्ञात्वा "recognizing him quite distinctly."

P. 13. L. 21.—चिरकालात् 'on account of (our) long (separation).'

P. 15. L. 3.—कर्मकाराः work without pay and कर्मकराः work for pay, see the Petersburg Dict. s. v.

P. 15. L. 6.—सिद्धमन्नम् 'cooked food.'

P. 15. L. 10.—भक्ष्यविशेषाणि, used as a neuter against the common grammatical rules, see also Benfey, Panchatantra II., note 767.

P. 15. L. 14.—मम रक्षणार्थम् 'in order to protect it from me.' The construction is according to the analogy of the older Sanskrit, where the verbs, meaning 'to protect' are used both with the ablative and with the genitive.

P. 15. L. 19.—प्रतिपत्तिपूर्वकम् 'respectfully.' अभ्यागत=अतिथि.

P. 15. L. 23.—शून्य 'meaningless.'

P. 16. L. 4.—Metre of s'loka 59 : S'árdúlavikrídita.—Regarding the hiatus in line b., see Tantra IV. and V., note to p. 9. l. 23.

P. 16. L. 8.—अधः 'on the ground.'—शृङ्गरहिता वृषाः 'hornless bulls,' *i. e.*, 'mean, spiritless creatures.'

P. 16. L. 15.—यावत् 'for, during'; a postposition construed with the accusative.—मठचिन्तां समाचर 'rule a convent.'

Digitized by Google

P. 17. L. 3.—निधानस्योष्मणा 'with the help of the fire imparted by the treasure.'

P. 17. L. 5.—वृद्धिं नी 'to increase.'—त्यागकर्मसमन्वित : (how much more using it) and spending it in (pious) gifts.'

P. 17. L. 7.—शाण्डिलीमाता karmadháraya compound. [Benfey].

P. 17. L. 11.—व्रतग्रहणनिमित्तम् 'in order to fulfil a vow to perform a religious ceremony.' The Brahman is wanted for the recitation of the Mantras or to assist otherwise in the ceremony.

P. 17. L. 12.—शुश्रूषित : 'honoured.'

P. 17. L. 15.—दक्षिणायनसंक्रान्ति : 'the summer-solstice.'—अनन्तदानफलदा । दानस्य फलं दानफलम् । तच्चानन्तमनन्तदानफलम् । तद्ददातीत्यनन्तदानफलदा । तस्माच्च सर्वे तस्मिन्नहनि बहूनि दानानि ददतीत्याशय : ॥

P. 17. L. 24.—दीयतेऽर्थेषु. The construction of दा with the locative is not very common, nor so good as that with the dative or genitive.

P. 18. L. 3. काकिणी 'one cowrie.'

P. 18. L. 4.—Metre of s'lokas 67, 68 and 70 : A'ryá.

P. 18. L. 10.—सदादान :—अदान : ; a pun on दान 'giving,' and दान 'the juice which flows during the rutting season from the temples of an elephant.'

P. 18. L. 12.—A pun on कर 'hand' and 'ray,' and on मित्र 'friend,' and 'the sun.'

P. 18. L. 16.—The construction of s'loka 71 is elliptic. The first line contains an enumeration of the requisites for a फलदं दानम् and तेषु सत्सु must be supplied after it. For similar constructions compare Tantra IV., s'loka 62, A'pastamba Dharmasútra I. IV. 14, 25.—अनन्ताय स्वर्गाय नि:श्रेयसायेत्यर्थ : ॥

P. 19. L. 17.—रसायन 'the elixir of life'; a medicine supposed to to prolong life indefinitely.

P. 20. L. 3.—सूर्यातपे दत्तवती 'exposed them to the sun'; a Prakritic construction.

P. 20. L. 11.—कामन्दकिशास्त्रम् 'the Institutes of Kámandaki.' We possess a work on Níti, called Nítisára, which is ascribed to

Digitized by Google

this author. According to a commentary on the Nítisára, quoted by Bábu Rájendralál Mitra in the preface to his edition of this work in the Bibliotheca Indica, p. 1., Kámandaki was a pupil of Chánakya, the minister of Chandragupta (B. C. 319).

P. 20. L. 21.—स्वहस्तिका 'a pickaxe.'

P. 20. L. 22.—जनचरणामलिनायाम् 'before it has been dirtied by the feet of the people' (who come to the Maṭha, and before the spoor of the mice has been effaced).

P. 21. L. 3.—Metre of s'loka 78: A'ryá.— हस्ततुलया 'by (using) their hands instead of scales.'

P. 21. L. 5.—Metre of s'loka 79: Vasantatilaká.—पूर्वतरम् 'long beforehand.'—प्रत्यङ्मुखैः 'with steps turned backward.' प्रत्युद्गम्: 'to go to meet'; whilst running away from his master, the peacock turns his face towards him, as if to meet him.—अपसरन् viz., स्वामिसकाशात्.—सरसः *i. e.* रसेन सहित:; the peacock is called so on account of his dancing, and the word make be rendered by 'sprightly.'

P. 21. L. 15.—Metre of s'loka 80; S'árdúlavikrídita.—कूटरचन 'a snare, a trap.'—किंवा करोतु पौरुषम् 'what can human strength effect?' On the meaning of the imperative, see Siddhántakaumudí II. p. 13.—

P. 21. L. 23.—महादुर्गम् 'places which are very difficult of access.

P. 23. L. 7.—सिद्धौ 'in reality.'

P. 23. L. 15.—गच्छति लोक इति दीन: ॥ For men fear, lest the poor visitor should have come to beg.

P, 24. L. 7.—अश्रोत्रियम् 'at which no S'rotriya is present.' A S'rotriya is a Brahman, who has studied, at least, one Veda together with its Angas or supplements.

P. 24. L. 9.—योगनिद्रा means originally 'the sleep induced by the practice of Yoga,' during which the soul is separated from the body, and thereby becomes enabled to see the nature of all things. Here it stands for 'deep meditation.'

Digitized by Google

P. 24. L. 17.— स्व : 'a relation or friend.' Compare the use of the Latin suus.

P. 24. L. 22. मूर्तं लाघवम् 'insignificance incarnate.'

P. 25. L. 2.— दीपखट्वौत्थच्छायेव 'just as the shadow of a bed projected by a lamp.' Dissolve खट्वाया उत्तिष्ठति खट्वौत्थ : । दीपेन खट्वोत्थो दीपखट्वौत्थ : । दीपखट्वौत्थासौ छाया च दीपखट्वौत्थ०. To stand in the shadow of a bed is considered improper and inauspicious.

P. 26. L. 1.—पुस्तक is according to Pánini a neuter. But other instances of its use as a masculine occur, e. g. Mṛichchhakaṭiká p. 49 l. 2. Stenzler.

P. 26. L. 15.—With the name प्राप्तव्यमर्थं: compare the early Christian pre-name 'Quodvultdea' and the Puritan 'Fight-the-battle-of-faith' etc.

P. 27. L. 13.—धवलगृह 'the upper story' of a house, called so because it is painted white.

P. 27. L. 20.—खण्डदेवकुल 'a temple in ruins.'

P. 27. L. 21.—दण्डपाशक 'a watchman.'

P. 28. L. 13.—Read राजमार्गासन्नश्रेष्ठिगृहद्वारि and translate 'at the door of the Shetṭ's house, which stood near the kings' highway and before which a Maṇdapa and an altar had been erected' रचितमण्डपवेदिकायाम् agrees with द्वारि.

P. 30. L. 21.—In Sanskrit three or more nouns, one of which is a neuter, take the adjective in the neuter plural Páṇini 1. 2. 69.

P. 30. L. 23.—Metre of s'loka 113 : Vaṅs'astha.

P. 31. L. 2 and 3,—यमान्तम् 'to Yama's (house)' see Tantra IV. and V., note to p. 4. l. 11.—पञ्चपदी न दीयते 'does not accompany him even five steps.'

P. 31, l. 14.—Metre of s'loka 118 : S'árdúlavikrídita.

P. 32. l. 6.—अस्ति see Tantra IV. and V., note to p. 6. l. 11.

P. 32. L. 15.—यत् whether (the birds rise.....still they obtain nothing that etc.)—प्राप्या पूर्वजन्मकृतकर्मफलप्राप्या विधिनेति तावत् ॥

P. 32. L. 18.—Metre of s'loka 122 : A'ryá.

Digitized by Google

P. 33. L. 2.—सुसंभिष्टौ the masculine is against the grammar, see above note to p. 30. l. 21.

P. 33, L. 10.—Metre of s'loka 128 : Vasantatilaká.

P. 33. L. 21.—वर्धमानपुर now called Burdwan [Benfey].

P. 35. L. 3.—सहामि the Parasmaipada instead of the A'tmanepada is against Paṇini's rules, but not uncomonon in the Panchatantra and epic poetry, see e. g. Tantra III. s'loka 50.—अन्यच्च used adverbially, 'and besides.'

P. 35. L. 8.—केवला see Tantra IV. and V., note p. 56. l. 15.

P. 36. L. 1.—पुलिन means here the low, sandy bank of a river, and may be translated by 'a ford,' a watering-place.'

P. 36. L. 10.—Regarding the hiatus, see Tantra IV. and V., note to p. 9. l. 23.

P. 36. L. 18.—Repeat यत्र with नयविक्रम°.

P. 37. L. 2.—नाङ्गिमा नोपभुज्यते 'a high station is not enjoyed' i. e., 'is of no use.' The example of a कृतनिश्चयिन् is the little Chátaka, who lives on rain-water only; the example of useless greatness is Indra, the rain giving god, who, in spite of his greatness, must perform a servile labour for the little bird.

P. 38. L. 5.—भक्ति 'honour, respect.'

P. 38. L. 7.—मन्त्रयत : the Parasmaipada is against Páṇini's rules, but common in epic poetry.

P. 39. L. 10.—Sense of s'loka 146 : 'If misers are called rich on account of wealth, which they hoard and hide in their houses, without using it, why may not we, the poor, be called rich on account of that same wealth which is hidden in the houses of rich misers? For we derive just as much benefit from it as they.'

P. 39. L. 15.—Metre of s'loka 148 : A'ryá.

P. 39. L. 23.—अक्षाणि 'the senses';—निरोध 'restraint.'

P. 40. L. 5.—स्वापतेय 'wealth.' स्वस्य पतिरिति स्वपतिः। तत्र साधु स्वापतेयम्॥

P. 40. L. 8.—Metre of s'loka 153 : Upajáti.

Digitized by Google

P. 40. L. 12.—यत्-हाति.—मानद्रविण० a karmadháraya-compound.

P. 40. L. 13.—शर्वः a name of S'iva. In the Veda the word designates a separate deity whose name is mentioned in the Avesta also amongst the demons (dævas).

P. 42. L. 2.—करोति 'reproduces'.—संपुटिका lit. 'a box for ornaments, *i. e.*, a collection of witty and beautiful phrases and tales.'

P. 42. L. 8.—Metre of s'loka 163 : A'rya'.

P. 42. L. 9.—प्रतिभय 'dangerous.'

P. 42, L. 17.—The construction of this s'loka is ungrammatical. The participles of the first line ought to stand in the genitive plural.

P. 43. L. 1.—यन्मया 'whatever (hard words I may have spoken formerly, etc.)'

P. 43. L. 5.—अस्मद्विधैर्मित्रैर्विद्यमानैः instrumental absolute, see Tantra IV. and V., note to p. 10. l. 16.

P. 43. L. 8.—Metre of s'loka 167 : A'ryá.

P. 44. L. 18.—Metre of s'loka 171 : A'ryá.

P. 45. L. 7.—Metre of s'loka 172 : Indravajra.

P. 45. L. 23.—Metre of s'loka 175 : Upajáti.—अभीक्ष्णम् 'repeatedly.'

P. 46. L. 1. वर्धति the Parasmaipada is against Páṇini's rules, but common in the Veda and in epic poetry.

P. 46, L. 14.—Metre of s'loka 179 : Upajáti.

P. 47. L. 14.—अप्राप्तस्यापि तस्य genitive absolute.

P. 47. L. 18.—Metre of s'loka 181 : S'árdúlavikrídita.

P. 49. L. 3.—Metre of s'loka 1 : Upajáti.

P. 49. L. 5.— पश्य उलूक° °see above note to p. 9. l. 23.

P. 50. L. 15.— येन तस्य वयं कुर्म इत्यादि 'in order that we may arrange its execution and attain its object.'

P. 51. L. 8.— सांशयिकम् 'a dangerous, doubtful undertaking.'

P. 51. L. 9 and 10.—युध्यताम् gen. pl. part. pres., according to the epic use, Parasmaipada. उपायत्रितयादूर्ध्वम् 'after (having tried) the three (first) means of success.'

Digitized by Google

P. 53. L. 9.—यथा कण्ठीरवो नागम् seems to refer to some story, told by the Bháradvájas in their sútra on Níti or Dharma. We have still the S'rauta and Grihya Sútras of this Vedic school, which studied a redaction of the Black Yajurveda.

P. 53. L. 11.—Bhímasena went into the camp of the Kíchakas dressed up as a dancing girl, see Mahábhárata IV., 376 ff.

P. 53. L. 15.—Construe : यस्य तेजस्तेजस्विनेजसां शमनं नास्ति etc.

P. 54. L. 3.—विना यानम् 'but only marching.'

P. 54. L. 6.—In the months Kártika and Chaitra, because then no rain falls. But in other treatises on Níti other months are recommended.

P. 54. L. 15.—द्वितीयम् 'the second (measure)', because, in the enumerations of the उपाया :, यानम् usually occupies the second place.

P. 54. L. 18.—Metre of s'loka 43 : Máliní.

P. 56. L. 3.—एकस्मिन्स्थाने तिष्ठन्तीत्येकस्थाः। 'close-standing.'

P. 56. L. 7.—शक्यम् viz. हिंसितुम्.

P. 56. L. 17.— कृशे गौरवम् 'who has any esteem for a weak man'?

P. 56. L. 18.—एकान्त : 'the only course of action possible.'

P. 57. L. 10.—तत्परीक्षार्थम् "that (has been done) in order to examine (them.)"

P. 57. L. 13.—द्वैधीभाव 'double-dealing, treachery.'

P. 57. L. 14.—दर्शयद्भिः 'by those, who excite (his cupidity).'

P. 57. L. 18.—एकदा "sometimes."

P. 57. L. 22.—एकभावः "honest, sincere."

P. 58. L. 12.—तीर्थानि 'helps.'

P. 58. L. 19.—S'loka 69 is taken from Mahábhárata I., p. 315, s'loka. 171^{b} and 172^{a} (Calcutta edition).

P. 58. L. 21.—आयुक्तकर्मा 'an official.'—प्रधानम् "excellence;"—यदि must be supplied from the preceding sentence.

अन्तर्वंशिक 'the superintendent of the harem.'

Digitized by Google

प्रशासक, usually प्रशास्तृ, is perhaps 'the spiritual guide.'

P. 59. L. 1 and 2.—प्रदेष्टृ 'the chief justice;' ज्ञापक 'the master of requests;' करपाल 'the receiver-general of taxes.'

P. 59. L. 5.—स्थानचिन्तक 'the quarter-master.'

P. 59. L. 14.—पङ्क्त्या विकिरन्तीति विष्किराः। 'the gallinaceous birds.'

P. 60. L. 1.—अप्रवक्तारम् 'who is unable to teach.'

P. 60. L. 10.—समुदितमुखेषु 'with one voice, all at once.'

P. 61. L. 6.—यदि must be understood with स्यात्.

P. 61. L. 10.—भास्वन्तो बहवः। according to the Vishṇupuráṇa seven suns will appear at the end of the Kalpa and burn the world [Benfey.]

P. 62. L. 9.—शशक seems to mean here 'rabbit,' not 'hare.'

P. 62. L. 23.—S'loka 85 is found Manu VII. 212.

P. 64. L. 8.—तस्य वचनस्य श्रद्धेयत्वात् 'in order (to make) his words credible.'

P. 66. L. 5.—कुजन्मन् 'a slave.' This s'loka, as well as the following two, probably, are taken from the chapter on Evidence of some Smṛiti. S'loka 93 is the only passage, I know of, that refers to temple property.

P. 66. L. 8 and 9.—प्रत्यक्षम् 'before the eyes (of the owner).' भुक्ति 'possession.'—प्रमाण 'proof (of ownership).' अक्षरलिखितम्, 'a document.'

P. 66. L. 23.—A pun on कौपीन. Taken with शुनः पुच्छ it means लिङ्ग, and taken with पाण्डित्य, it means पाप.

P. 67. L. 8.—Construe धर्महीना [यद्यपि] परार्थाय [परमार्थाय धर्मं वरणार्थं] मीश्वरेण सृष्टा [स्तथापि] पशवो यथा मूत्रपुरीषार्थमाहाराय च केवलं [भवन्ति].

P. 68. L. 10.—परत्र भवं सुखं इति परत्रम्। स्वर्ग इत्यर्थः. This irregular formation occurs also in the Mahábhárata, (see the Pet. Dict.) and in another passage of the Panchatantra. Tantra IV., s'loka 107, where the Mss. have परत्रे and the edition gives wrongly परत्र.

P. 68. L. 15.—अश्वानृते 'a false (decision) about a horse etc.—

Digitized by Google

P. 68. L. 18.—स व्याद्यः, *i. e.*, प्राड्विवाको राजा न्यायो वेत्यादि 'or let his decision declare the truth, *i. e.*, if his decision is not just.'

P. 69. L. 13.—रोहते A'tmanepada against the grammar, but according to the epic usage; the s'loka is taken from the Mahábhárata.

P. 69. L. 18.—Metre of s'lokas 112 and 113: Vańs'astha.—अनायतिक्षमम् "not good for the future."

P. 70. L. 16.—यज्यामि; a S'rautágnihotrí must perform every year a Cháturmásya pas'u.

P. 70. L. 21.—हिमपातो व्यर्थतां नीयते "we shall be able to defy the cold rain."

P. 71. L. 4.—श्वान=श्वन्.

P. 71. L. 21.—The Brahman thinks, that the beast is an 'evil spirit,' because everybody, whom he meets, takes it for some unclean creature.

P. 72. L. 5.—Metre of s'loka 119: A'ryá.

P. 73. L. 1.—शुष्ककलह 'a pretended dispute.'

P. 73. L. 10.—भीतः शत्रुः पलायनपरः पुण्यैर्लभ्यते (To find) the foe, timid and intent on flight, is a reward for meritorious deeds (performed in a former life).'

P. 73. L. 12.—छिद्रम् "an opportunity (for attack)."

P. 73. L. 15.—Regarding s'loka 124, see above note to p. 9 l. 19.

P. 74. L. 13.—Metre of s'loka 126: Upajáti,—पतंगवृत्तिः 'one who behaves like a moth,' *i. e.*, who spontaneously goes to meet a danger, just as the moth flies towards a light.

P. 74. L. 15.—रक्षितैस्तैः instrumental absolute.—धनं पुन [र्भवेदिति शेषः]

P. 75. L. 1.—The answers given by the first four Ministers of Arímardana to the question of their master, what is to be done with the captive Sthirajívin are somewhat singular. Instead of stating how he is to be treated, they give lectures on

Digitized by Google

the excellence of kindness, treachery, bribing and of the employment of force respectively, just as the ministers of Meghavarṇa in the beginning of the book. These answers are, however, intended to indicate indirectly the manner how Sthirajívin is to be used. Raktáksha, apparently, means to say, "Hear Sthirajívin's advice ; he spoke to his own master in favour of peace, and that is the right advice. Therefore treat him well and use him to make peace with thy enemy," (see line 5) while Krúráksha holds, that the captive is to be used to create discord in the enemy's camp, Díptáksha, that he is to bribe the opposite party and Vakranása, that the war is to be continued and Sthirajívin is to be killed without mercy.

P. 75. L. 22.—" The ibis, who wades cautiously and gently through the water, as if he were afraid to hurt any small animals, still deludes and destroys his enemies, the fishes, by this very gentleness."

P. 76. L. 11.—Ráma bribed Vibhíshaṇa, Rávaṇa's brother, by the promise of the throne of Lanká, to tell about his brother's strength.

P. 76. L. 13.—Rákshasa, originally the Minister of Nanda, became, after the death of the latter, the adviser of Malayaketu, the son of Parvatendra. He was rendered by the stratagems of Chāṇakya an object of suspicion to this prince and was consequently dismissed by him. See H. H. Wilson Hindu Theatre II, P. 127 ff.

P. 76. L. 18.—Regarding s'loka 140 see Tantra IV and V., note to p. 42. l. 12.

P. 77. L. 5.—साम्यं नी ' to satisfy.'— अग्निम् scil. वाडवम् compare also Tantra IV and V note to p. 9. l. 16.

P. 78. L. 2.— कर्मणा ' in reality.'

P. 78. L. 4.—वीर्यधनप्रैदः । वीर्यमेव धनमिति वीर्यधनम् । तत्प्रददतीति वीर्यधनप्रदास्तैः ॥

P. 78. L. 7.—हेलाकृष्टस्फुरत्खड्गदीप्तांशुपरिपिञ्जरैः " (by arms) which are coloured reddish brown by the shining rays reflected from a glittering sword that has been drawn in fury."

Digitized by Google

P. 78. L. 10.—अन्याङ्कसुप्तेव "(though) she just slept in another's arms."

P. 78. L. 18.—उपादत्ते "attacks, seizes."

P. 78. L. 21.—Metre of s'loka 155 : Upajáti.—भयेन युक्ताः "Those who, themselves filled with fear, (cruelly etc.)" It is, however, very doubtful, whether this reading, which is given by the Mss., is correct.

P, 79. L. 22.—मणिरेव दीप इति मणिदीपः 'a jewel lamp' where the sparkling of a precious stone takes the place of the burning wick.

P. 80. L. 1.—Regarding s'loka 161, see Tantra IV and V, note to p. 72. l. 3.

P. 80. L. 5.—परिग्रहासंमतेन "against the advice of my followers."

P. 81. L. 4.—स्वदुर्गमध्ये. The crow is the Chaṇḍála among the birds and hence not worthy to live in the town. His proper place is outside the gates in the Vádí.

P. 81. L. 6.—एतावत्कालं यावत् "for so long time, up to this time."

P. 81. L. 9.—Metre of s'loka 164 : Vaṅs'astha.

P. 82. L. 2.—समयधर्मः 'a covenant, an agreement.'

P. 83. L. 3.—प्रतिलोमतः सेवन्ते वैपरीत्येनासन्तं नयमाश्रित्य सेवन्त इत्यर्थः।

P. 83. L. 16.—समागमनम् '(our) meeting.'

P. 83. L. 21.—यस्ययस्य.....अक्रियमाणस्य must be taken as a genitive absolute; "if a deed, especially one that promises a (good) result etc."

P. 84. L. 10.—Metre of s'loka 172 S'árdúlavikrídita.—It alludes to Bhíma's serving as cook in the palace of the king of the Matsyas during the exile of the Paṇḍavas, see Máhábharata Viráṭaparva, Adhyáya VIII., s'loka 1 ff.

P. 84. L. 18.—Metre of s'lokas 174 and 175 : Sárdúlavikrídita. —Yudhishṭhira, the son of Yama (धर्मात्मज,) served in the palace of King Viráṭa, under the guise of a Brahman. See Máhábhárata Viráṭaparva Adhyáya VII.

P. 85. L. 9. Metre of s'lokas 177 and 179 : Vasantatilaká.

Digitized by Google

P. 86. L. 5.—भविष्यत् "destined (to prosper)."

P. 86. L. 6.—तत्तव भविष्यत इत्यादि । "Thus I knew by the errors (of your enemy) that you were destined (to prosper) and that he was destined to be conquered. (For) wise men know the fate of those who are destined (to prosper) and of those who are destined to fail from the course of their actions."

P. 86. L. 10.—Regarding s'loka 181, see above note to p. 21. l. 5.

P. 86. L. 17.—With s'loka 184 compare the saying: Quem Deus vult perdere, prius dementat.

END.

Digitized by Google

LIST OF ERRATA IN THE TEXT.

P. 8. l. 22	शत्रुतां	read.	शत्रुताम्
P. 12. l. 4	बबुक्षा	"	बभुक्षा
P. 19. l. 10	सभत्येति	"	समभ्येति
P. 23. l. 21	गछन्तो	"	गच्छन्तो
P. 27. l. 17	अनुरक्तपा	"	अनुरक्तया
P. 28. l. 21	अतिक्रान्तलग्न°	"	अतिक्रान्ते लग्न°
P. 37. l. 16	Put stop after गच्छावः		
P. 41. l. 3	तछुत्वा	read	तच्छुत्वा.
P. 51. l. 19	पुष्ठं	"	पुष्टं
P. 52. l. 3	°त्तिष्टेत्कृ°	"	°तिष्टेत्कृ°
P. 57. l. 1	सुप्रतिष्टितः	"	सुप्रातिष्टितः
P. 64. l. 15	तिष्टति	"	तिष्ठति
P. 71. l. 7	सारमेयत्वे न	"	°त्वेन
P. 74 l. 16	°मशङ्कमीना°	"	°माशङ्कमाने°
P. 75 l. 4	क्षापे	"	क्षापे

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google